Q222
N52.2
7776

Kendriya Sanskrit Vidyapeetha
LIBRARY
TIRUPATI

Author ______________________ *Cl. No.* ______________

Title ______________________ *Acc. No.* ______________

If the book is not returned on or before the date last mentioned an over - due charge of **5 Paise** per book per day will be collected.

Due date of return	Due date of return	Due date of return	Due date of return
1/11			

VERIFIED 1985

VERIFIED 1989

RC

CATAL

हयशीर्ष पञ्चरात्रम्

(आदिकाण्डम्)

THE
HAYAS'IRṢA PAÑCHARĀTRAM

(An ancient treatise on architecture and Iconography)

EDITED BY
LATE PANDIT BHUBAN MOHAN SĀNKHYATIRTHA
WITH A FORWARD BY
PROFESSOR DINES CHANDRA BHATTACHARYA, M.A.
AND
INTRODUCTORY & PREFATORY NOTES
BY
SREE KSHITIS CH. SARKAR, M.A., B.L.
Honorary Secretary, Varendra Research Society

Vol. II.
ĀDIKĀNDA
Paṭalāḥ 15-44

(पञ्चदशः पटलात्—चतुश्चत्वारिंशत्तम पटलम्)

VARENDRA RESEARCH SOCIETY
RAJSHAHI (EAST PAKISTAN)
1956

All rights reserved]

Price Rs. 7/- only.

Published by
K. C. Sarkar,
190, B. T. Road, Alambazar.

KENDRIYA SANSKRIT VIDYA PEETHA,
TIRUPATI.
LIBRARY.

To be had of—(In East Pakistan)
(1) The Hony. Secretary, Varendra Research Society,
Rajshahi (East Pakistan)

In India—
(2) 'Bipulasree'—189, B. T. Road, 'Asoka-Garh' Calcutta-35.
(3) The Sanskrita Pustaka Bhandar—38, Cornwallis Street, Calcutta-6.

7776
7776
Q222
N52.2
Q222
N52.2

Printed by
D. P. Mitra, at the Elm Press,
63, Beadon Street, Calcutta-6.

VOL .II.

PREFATORY NOTE

The Hayaśirsha Pañcharātra constituted, the Ādi Kānda, the Sankarsana—Kānda, the Linga-Kānda and the Saura-Kānda.

Kumar Sarat Kumar Ray, Founder President of the Varendra Research Society, Rajshahi secured manuscript of the Ādi Kānda for his personal library on purchase from Nagendranath Vasu (Prāchāvidyā mahārnava) and the Manuscript of the Saura Kānda was obtained or the Varendra Research Society from the house of the late Pandit Akshay Kumar Vidyaratna, Chāmtia, Rajshahi complete in 39 patalahs dated 1648 of the S'aka era (1726 A.D.)

A word is necessary to explain the reason of the delay in the publication of the Ādi Kānda. Kumar Sarat Kumar Ray got a press copy of the Ādi Kānda prepared by the late Pandit Bhuban Mohan Sānkhyatirtha at Calcutta and could print out fourteen patalahs (chapters) out of 44 Patalahs till Pandi Bthuban Mohan died. The first fourteen patalahs were printed with Sanskrit annotations by him and the remaining portion of the press copy was left unannotated. On the death of the learned Pandit, Kumar Sarat Kumar Ray entrusted the personal copy of the manuscript along with the unannotated press copy to Prof. Dineschandra Bhattacharyya in 1943 for favour of editing the remaining portion of the Ādi Kānda (15th to 44th Patalah). In the meantime, Kumar Sarat Kumar breathed his last. Since 'Hayaśirsha' is expected to throw a flood of light on the different branches of Hindu Iconography and ancient architecture, after the division of the territory, the Varendra Research Society in East Pakistan in view of the importance and unavailability of the unpublished manuscript decided to present the printed portion viz. the unbound portion of fourteen patalahs after incorporating the contents, Introduction with a foreward as 'Vol. I' to the learned public and undertook to print off the remaining portion of the 15th to 44th Patalahs as Vol. II out of the special fund contributed by one of the members of the 'Varendra Research Society' (Rai Bahadur) Brajendra Mohan Maitra in aid of publications.

Unfortunately, Prof. Dineshchandra Bhattacharyya could not execute the work entrusted to him but he however on being approached returned only the press copy in 1953 or so made over to him by the Founder President some ten years back. Regard being had to the

extreme importance of the treatise in question, we decided to print the unannotated portion of the press copy for its proper use by the academic world to obviate further delay.

On account of the difficulty of printing the matter in Devanāgri character efficiently, Messrs. Gopal Printing Works at Calcutta undertook the job of printing in 1953 but unluckily they could during the span of three years or so, print only 8 (eight) forms after too many reminders and personal calls at the press. At last, intervention of the Indian High Commission at Dacca and Rajshahi was sought for to obtain the printed matter to make over the same to another press Messrs. Elm Press, Calcutta through the agency of Sri Haripada Bhattacharyya of of the Sanskrit Pustak Bhandar.

We regret, there are a few mistakes and misprints which could not be avoided on account of the many disadvantages we had to go through. Pandit Ramendra Chandra Tarkatirtha, Vice-Principal of the 'Maharani-Hemanta Kumari Sanskrit College' Rajshahi helped us in seeing through a considerable portion of final proofs. Sri Hariadda Bhattacharya of the Sanskrit Pustak Bhandar, Calcutta, took pains to select the press and deliver the already printed forms to Messrs. Elm Press for binding together with the remaining portion to constitute Vol. II in completion of the job speedily. Both of them deserve thanks for their services.

Kshitis Ch. Sarka,
Honorary Secretary.
Varendra Research Society.

HAYASIRSA PĀNCHARĀTRAM
(ĀDIKĀNDAM)
CONTENTS OF VOL. II

————

हयशीर्ष पञ्चरात्रम्

पञ्चदशः पटलः

[शिलालक्षणम्]

[शिलाग्रहण देशनिर्णयः, शास्त्रोक्तदेशेभ्यःशिलानामलाभे कुतः शिलाग्राह्यास्तस्य निर्णयः, शिलाग्रहणयोग्य भूमिनिर्देशः, शिलानांबालाद्यवस्थात्रय कथनं पुंस्त्रीनपुंसकीर्त्तनञ्च, कीदृश्या शिलया किं कार्य्यं तस्य निर्देशः, शिलानां वर्णभेदाः, अप्रशस्तसगर्भशिला दोषाः, प्रशस्तशिलागुणाश्च ।]

—:०:—

भगवानुवाच

शिलाया लक्षणं वक्ष्ये तदिहैकमनाः शृणु ।
मृण्मयी दारुघटिता लोहजा[1] रत्नजा तथा ॥ १ ॥
शैलजा गन्धजा चैव कौसुमा[2] सप्तमी तथा[3] ।
कौमुदी रत्नजा[4] चैव मृण्मयी प्रतिमा हिता ॥ २ ॥
तत्कालपूजिताश्चैताः[5] सर्वकामफलप्रदाः ।
अथ शैलमयीं वक्ष्ये शिला यत्र प्रपूज्यते[6] ॥ ३ ॥

1. लोहजा A, लौहजा B, C.
2. कौमुदी A, कौसुमा B, C.
3. स्मृता A, तथा B, C.
4. कौडमा रत्नजा A, कौडमा गन्धजा B, C.
5. श्चैताः A, शैव B, C.
6. च पूज्यते A, प्रपूज्यते B, C.

*त्रिकूटे मन्दरे चैव शङ्करस्य पुरे[1] गिरौ।
माल्यवत् पर्वते चैव मलये गन्धमादने ॥ ४ ॥
[2]दशैतेषु शिला ग्राह्या अलाभे चापरान् शृणु।
श्रीगिरौ श्रीकटे चैव किष्किन्धे[3] रैवते तथा ॥५ ॥
मन्दरे चैव माहेन्द्रे कैलासे विन्ध्यपर्व्वते।
चित्रकूटे तथा श्वेते दर्दुरे सम्भ[4]पर्व्वते ॥ ६ ॥
एतेष्वपि शिला ग्राह्याः पुण्येष्वन्येष्वपि[5] द्विजाः।
पर्व्वतानामलाभे तु गृह्णीयाद्भूगतां शिलाम् ॥ ७ ॥
आग्नेयी वायवी चैव माहेन्द्री वारुणी तथा।
चतस्रो भूमयः प्रोक्तास्तासां वक्ष्यामि लक्षणम् ॥ ८ ॥
ब्रह्मवृक्षैः सकाश्मर्य्यैः[6] खदिरै र्वेणुभिश्चिता[7]ः।
तोयश्चास्वल्पकं यस्यां पतङ्गैरलिभिर्युताः ॥ ६ ॥
मयूरैस्तित्तिरैर्गृध्रैः सारसै[8]र्या समाकुला।
आग्नेयी सा क्षितिः प्रोक्ता कठिनातत्र या[9] शिला ॥ १० ॥
तृणतोयविहीना या ग्रीष्मे स[10]मृगतृष्णिका।
उषरा यत्र दृश्यन्ते शृगाला[11] बहवस्तथा ॥ ११ ॥
बिभीतकार्कसंकीर्णा कर्करा[12] स्त्वहिसंवृता।
पीलुश्लेष्मातकाकीर्णा वायवी सा प्रकीर्त्तिता ॥ १२ ॥

---

* "त्रिकूटे मन्दरे चैव निषधे नील पर्व्वते" इत्यधिकः पाठः B पुस्तके दृश्यते।

1. पुरे A, B, छरे C.
2. ………………2 B पुस्तके "दशैते छशिला ग्राह्याः पुण्येपण्येष्वपि द्विजाः" इति पाठो वर्त्तते। प्रमादपतितोऽयमंशः।
3. किस्किन्धे A, B, किस्कन्ने C.
4. सम्भ A B, सह्य C.
5. सपत्रा B.
6. ब्रह्मब्रह्मसकास्वर्य्यैः C.
7. श्वेताः C.
8. सरलैः C.
9. यत्रसा B, C.
10. सा C.
11. मृणाला B, शृगाला A, C.
12. सार्कवा A, कर्करा B, C.

तद्भूमिसम्भवा वर्ज्या शिला यत्नेन देशिकैः ।
व्रीहिक्षेत्रं स्थितं यस्यां दक्षिणे सुमनोहरम् ॥ १३ ॥
क्षीरिणः फलिनो वृक्षाः सपुष्पा[1] यत्र पश्चिमे ।
जलाशयं सनलिनं यस्यामुत्तरतः स्थितम् ॥ १४ ॥
माहेन्द्री सा क्षितिः शस्ता शिलातत्रोद्भवाचया ।
जलाशयैः पद्मषण्डैर्मण्डिता या समन्ततः ॥ १५ ॥
कीर्णा पुष्पवनैर्या च वारुणी सा क्षितिः शुभा ।
तत्रोद्गता शिला या च[2] सा शस्ता सुरसत्तम[3] ॥ १६ ॥
आग्नेयी गुर्जराद्येषु वायवी मरुषु स्मृता ।
माहेन्द्री मध्यदेशेषु[4] अनूपेषु च वारुणी ॥ १७ ॥
क्षाराम्ल[5]सेविता या च नदीतीरसमुद्भवा ।
पुरमध्ये[6] स्थिता या च तथा पितृवने स्थिता ॥ १८ ॥
चतुष्पथे स्थिता या च मृच्छिलापङ्कने[7] (?) पङ्किला च या ।
उषरे[8] च तथा मध्ये वाल्मीके[9] चापि[10] या स्थिता ॥ १९ ॥
सूर्य्यरश्मिप्रतप्ता या या च दग्धा वनाग्निना[11] ।
अन्यकल्पो[12]पयुक्ता या अन्यदेवार्थ[13] निर्म्मिता ॥ २० ॥
क्रव्यादाद्यैरुपहता वर्ज्या यत्नेन वै शिला ।
विवर्णा[14] च कुवर्णा च रूक्षवर्णा च वर्जिता ॥२१॥
सभाचत्वरसंस्था च ह्यत्यन्तोपहता शिला ।
येन केनचिदानीता वर्जनीया तथा शिला ॥ २२ ॥

---

1. सपत्रा B, C.
2. तु B, C.
3. सुरसत्तमः B, C.
4. तु B, C.
5. क्षीराम्बु B, क्षाराम्बु C.
6. पूर्वमध्ये B, पुरमध्ये A, C.
7. म्लेच्छालाक्षणे (?) B, C.
8. उरसे A, उषार B, C.
9. मल्मीके A, वाल्मीके B; C.
10. यापि C.
11. दवाग्निना B, C.
12. कर्म्मो A. कल्पो B, C.
13. चाण्यदेवाद्य A, चाण्यदेवार्थं B, C.
14. …………13, A, C, पुस्तकयोरेतत् पंक्तिद्वयं नास्ति ।

पुण्यसिन्धूद्भवा ग्राह्या पुण्यतीर्थोद्भवा च या ।
नदीपर्व्वतसंलग्ना वृक्षच्छायासमावृता[1] ॥ २३ ॥
निमग्ना भूतले या[2] वा संस्पृष्टा[3] सूर्य्यरश्मिभिः ।
अन्तर्जलोषिता[4] नद्यामेकवर्णा मनोरमा ॥ २४ ॥
पाण्डुरा चारुणा पीता कृष्णा शस्ता तु वर्णिनाम् ।
न यदा लभ्यते[5] सम्यग्[6] वर्णिनां वर्णतः शिला ॥ २५ ॥
वर्णाद्यापादनं[7] तत्र जुहुयात् सिंहविद्यया ।
कृते वर्णस्य जनने[8] तस्य वर्णस्य सा शुभा ॥ २६ ॥
श्रेष्ठवर्णा सुवर्णा च रेखा[9] सर्व्वस्य शस्यते ।
अपरस्य तु वर्णस्य श्रेष्ठायां[10] न प्रशस्यते ॥ २७ ॥
वर्णिनामिह सर्वेषां कृष्णरेखा प्रशस्यते ।
शिलानामिह सर्व्वासां शुक्लरेखा प्रशस्यते ॥ २८ ॥
रेखानामपि सर्व्वासां व्यत्यासे[11] होममाचरेत् ।
पातालनरसिंहेन सहस्रं देशिकोत्तमः[12] ॥ २९ ॥
तर्पिते मन्त्रराजे तु ततः सा शुभदा नृणाम् ।
विपरीते तु विमलेबिम्बके हीरके[13] तथा ॥ ३० ॥
इममेव विधिं कुर्य्यादन्यस्मिन्नपि गर्हिते ।
युवा[14] मध्या भवेद्ग्राह्या बाला वृद्धा च गर्हिता ॥ ३१ ॥

---

1. मनावृता A, B, C. 2. समावृता A, वा B, C.
3. याऽस्पृष्टा A, संस्पृष्टा B, C. 4. लोषिता A, लाश्रिता B, C.
5. मनोरमा A, मनोहरा B, C.
6. लभ्यते A. नद्यते B, C. 7. सम्पत् A, सम्यक् B, C.
7. द्या A, द्यो B, C.
8. ....8, कृष्णवर्णादिज्वलने B, कृते वर्णस्य जनने A. C.
9. रेखां B, रेखा A, C. 10. श्रेष्ठस्य A, श्रेष्ठायां B; C.
11. व्यत्यासे A, वेद्यांदे B, C. 12. देशिकोत्तम A, देशिकोत्तमः B, C.
13. बिम्बके A. विन्धके B, C. 14. युवा A, छरा B, C.

सुगन्धा निविड़ा स्निग्धा तथा गम्भीरनिस्वना।
शीतला या[1] च तेजाढ्या युवेति[2] प्रोच्यते शिला ॥ ३२ ॥
तद्रूपा प्रोच्यते मध्या[3] किन्तु सा कठिना भवेत्।
अतिमृद्वी भवेद् बाला वृद्धातिकठिना मता ॥ ३३ ॥
टङ्काघातासहा[4] बाला वृद्धा लोकक्षयी स्मृता[5]।
स्त्रीपुंनपुंसकञ्चैव लक्षणेनैव लक्षयेत् ॥ ३४ ॥
उत्पाद्यमाने दृश्यन्ते तिन्दुकालातवज्ज्वलन्।
स्फुलिङ्गाः श्रूयते नादः कांस्यघण्टानिनादवत् ॥ ३५ ॥
मूले मध्ये तथाग्रे च पुंलिङ्गेति च सा स्मृता।
तदेव लक्षणं यत्र मन्दंमन्दं[6] प्रतीयते ॥ ३६ ॥
स्त्रीलिङ्गेति मता सा च भिन्नकांस्यध्वनिस्तु या।
नपुंसकेति सा ज्ञेया न यत्रैतद्द्वयं भवेत् ॥ ३७ ॥
पुंलिङ्गैः प्रतिमा कार्य्या स्त्रीलिङ्गैः पादपीठिका[7]।
पिण्डिकार्थन्तु[8] सा ग्राह्या दृष्टा या पण्डलक्षणा[9] ॥ ३८ ॥
लिङ्गानान्तु विपर्य्यासे पूर्व्वोक्तं होममाचरेत्।
छेदने भेदने वाथ शिलागर्भं समीक्ष्यते[10] ॥ ३९ ॥
दृश्यन्ते मण्डला यस्यां सगर्भान्तां[11] विनिर्द्दिशेत्।
मण्डुको मण्डले तु स्याल्लोहिते नात्र संशयः ॥ ४० ॥

---

३५ तिन्दुको वृक्षभेदः। तेँदु इति ख्याते वृक्षे इति शब्दस्तोम महानिधौ।

---

1. शीलया B, शीतलाया A, C. 2. युवे A, स्वरे B, C.
3. प्रोच्यते मध्या A, B, मध्यमा क्षात्राकीर्णा C.
4. सहा A, सहा B, C. पुस्तकयोर्नास्तिः।
5. लोकक्षयीस्मृता A, लोकक्षयङ्करी B, C.।
6. मन्दंमन्दं A, C, मन्दमन्दं B. 7. पीठिका A, C, पीठका B.
8. पिण्डिकार्थन्तु A, पिण्डिकान्नन्तु B, C.
9. …………7 दृष्टा या पशुलक्षणा A; तृष्णाया पशुलक्षणा B, तृष्णा या पुम्र्लक्षणा C.
10. समीक्ष्यते A, समीक्ष्यते B, C. 11. सगर्भान्तां A, सगर्भतां B, C.

हरिद्राभे[1] भवेद् गोधा कृष्णसर्पस्तथासिते।
निस्त्रिंशसदृशे[2] तोयं गृहगोधा तु कर्कशे॥ ४१ ॥
आखुः पिङ्गलवर्णे स्यादरुणे शरटस्तथा।
पिङ्गवर्णे[3] तु पाषाणः पद्माभे सिकता भवेत्॥ ४२ ॥
वृश्चिकः स्याद्विचित्रे तु पीते नीले पतङ्गकः।
पारावताभे खद्योतं मण्डले तु विनिर्दिशेत्॥ ४३ ॥
अकल्पना तु मण्डुके दौर्भाग्यं गोधयाभवेत्।
सर्पे[4] विषेण मरणमनोवृष्टिस्तथा जले॥ ४४ ॥
[5] धनहानिस्तुगोधायामाखूनामिष्टजो भवेत्।
अल्पायुषस्तु शरटे पाषाणैर्विद्युता वधः॥ ४५ ॥
वालुकायामनावृष्टिः कलहो वृश्चिके भवेत्।
राष्ट्रोच्छित्तिस्तु शलभे खद्योते[6] गोत्रसंक्षयः।
तस्मात् परीक्ष्य यत्नेन शिलां[7] गृह्णीत देशिकः॥ ४६ ॥
सगर्भया तु शिलया रूपकं क्रियते यदि।
तद्देशे म्रियते राजा यजमानोऽथ देशिकः॥४७॥
शिलायामपि वृक्षेषु यत्नाद्गर्भं समीक्षयेत्[8]।
सौभाग्यदा शैलजा स्यात्[9] स्वर्णजा पुष्टिदा भवेत्॥४८॥
सुखप्रदा[10] स्यान्मणिजा राजती कीर्त्तिदा भवेत्।
ताम्रजा धनदा प्रोक्ता श्रीप्रदा वृक्षजा[11] मता॥४९॥

---

४२ शरटः कृकलास इति शब्दस्तोम महानिधौ।

---

1. हरिद्राभे A, B, हरिद्राभे C.
2. निःस्त्रिंश A, B, निस्त्रिंश C.
3. पिङ्ग A, B, पिङ्गल C.
4. सर्पे A, C, सर्प B.
5. धनहानिस्तु A, B, धनहानिगेधिया भवेत् C.
6. खद्योते A, B, खद्योतो C.
7. शिलां A, B, शिला C.
1. ब्रह्मजा B. 2. भोगजा B. 3. कृत्वा B.
8. समीक्षयेत् A, B, समीक्षते C.
9. भाग्यदा शैलजा स्याच्च A, B, सौभाग्यदा शैलजा स्यात् C.
10. सुखप्रदा A, B, सुखप्रजा C.
11. वृक्षजा A, ब्रह्मजा B, C.

कौसुमा सुखदा प्रोक्ता गन्धजा भोगदा[1] मता।
प्रत्यग्रस्थापिता वापि[2] मृण्मयी सर्व्वसिद्धिदा[3] ॥५०॥

वृक्षादिनान्तु भेदेन कामभेदेन वा नृणाम्।
भिद्यते बहुधा वीरै[4]र्ज्ञात्वा[5] कार्य्यातु देशिकैः[6] ॥५१॥

इति हयशीर्षे (महा) पञ्चरात्रे द्वादश साहस्त्रिके आदिकाण्डे

(पञ्चदशः)

शिलालक्षण पटलः ॥१५॥

आदितः श्लोक-संख्या—३७७

---

1. भोगदा A, भोगजा B, C.
2. वापि A, B, वापि C.
3. सर्वसिद्धिदा A, B, सर्वकामदा C.
4. धीरै A, B, धीरै C.
5. ज्ञात्वा A, C, कृत्वा B.
6. तद्विदैः A, B, देशिकैः C.

षोड़शः पटलः

[वनयागः]

[यागविहित शुभदिननिर्णयः, नृसिंहादीनां पूजनेकर्त्तव्यता, वनजागोक्त परदिवसकृत्यम्]

भगवानुवाच

सुवारे सुतिथौ योगे [1]स्वर्क्षे सुकरणान्विते[1]।
अपूर्यमाणपक्षे तु सुग्रहे चोत्तरायणे ॥ १ ॥
यजमानानुकूले तु प्रतिमार्थं व्रजेद्गुरुः।
श्वेतवस्त्रपरीधानः श्वेतचन्दनचर्च्चितः ॥ २ ॥
श्वेतपुष्पकृतापीड़ः शिल्पिभिः सहितो गुरुः।
निपुणैः शिल्पिभिः सार्द्धं सहायैर्वलवत्तरैः ॥ ३ ॥
नृसिंहं पूज्य विज्ञाप्य पूज्य टङ्कादिकन्ततः।
[2]ध्यात्वा हरिं हविः प्राश्य मन्त्राङ्गन्यस्तविग्रहः ॥ ४ ॥
ब्राह्मणान् वाचयित्वा तु [3]भक्त्या मङ्गलदर्शनम्।
दधि दूर्व्वा रोचनास्वा आदर्शं कुसुमंसितम् ॥ ५ ॥
फल[4]न्तु पूर्णकुम्भञ्च [5]वन्दयित्वा वनं व्रजेत्।
दिव्यान्तरीक्षभौमानि निमित्तान्युपलक्षयन् ॥ ६ ॥
[6]यायाच्छुभनिमित्तेषु [7]विपरीते निवर्त्तयेत्।
[8]त्रिरायम्य ततः प्राणान् ध्यायेत् सिंहतनुंहरिम् ॥ ७ ॥

1..........1. नक्षत्रे करणान्विते A, स्वर्क्षे सुकरणान्विते B, C.
2. ध्यात्वा A, ध्यायन् B, C.
3. भक्त्या A, कुर्यात् B, C.
4. न्तु A, ञ्च B, C.
5. वन्दयित्वा A, C, वन्दयित्वा B.
6. यायाच्छुभ A, C, मया शुभ B.
6. विपरीते निवर्त्तयेत् A. C, विपरीतेन वर्त्तयेत् B.
8. त्रिरायम्य A, B, त्रिधायम्य C.

7776

पुनश्चाष्टोत्तरं जप्त्वा पातालमुषलं जपेत्[1]।
गीतवाद्यवरौ[2] दृष्ट्वा यात्रा स्यात् सिद्धिदा नृणाम् ॥८॥
लक्ष्मीं ध्यायन् वनं यायात् सहायैः शिल्पिभिः सह।
शङ्खकाहलशब्दैश्च पुण्याहजयमिश्रितैः ॥ ९ ॥
ऋग्यजुःसामसंघैश्च[3] ध्यायन् सिंहं वनं व्रजेत्।
प्राचीं दिशमथोदीचीमैशानीम्वा व्रजेद्गुरुः ॥ १०॥
भूधराद्यास्तु ये पूर्वं सस्थानाः[4] कथिता मया।
तत्र गत्वा समीपे तु कृतरक्षो वनं विशेत् ॥ ११ ॥
प्रविश्य तत्र यत्नेन शिल्पिभिः सहितो गुरुः।
निरूपयेत् समन्तात् तु वृक्षम्वाप्यथवा-शिलाम् ॥१२॥
लक्षणेन तु[5] मन्त्रज्ञो यत्पूर्व्वं कथितं मया।
एकवर्णां शिलां दृष्ट्वा बाह्यदोषविवर्ज्जिताम् ॥१३॥
चतुर्दिक्षु समं कृत्वा भूमिभागं विशोधयेत्।
प्लाव्यतोयेन पूतेन[6] गोमयेन विलेपयेत् ॥१४॥
तत्रैव मण्डपं कृत्वा वासुदेवं ततोजपेत्।
पताकैस्तोरणैश्चित्रैर्मण्डपं तं[7] विभूषयेत् ॥१५॥
पूजयेदथ दिग्देवान्[8] भूतक्रूरबलिं हरेत्।
मांसं हरिद्राच्चूर्णञ्च दधिशक्तुसमन्वितम्[9] ॥१६॥
सलाजं[10] माषभक्तञ्च दद्यात् क्रूरबलिं बुधः।
विष्णुंपूज्याविधानेन क्रमशस्तान् प्रपूजयेत् ॥१७॥

---

1. जपेत् A, यजेत् B, C. 2. वरौ दृष्ट्वा A, वरोत्क्रुष्णा B, C.
3. संघैश्च A, शब्दैश्च B, C. 4. सस्थानाः A, सस्थिता B, C.
5. तु A, B, पुस्तकयोरस्ति C. पुस्तके नास्ति।
6. तोयेन पूतेन A, पूतेन तोयेन B, C. 7. र्मण्डपान्तं A, C, मंराडपान्त्तं B.
8. दिग्देवान् A, दिग्वारान् B, C.
9. हरिद्राचूर्णञ्च दधिशक्तु A, हरिद्रांचूर्ण न्तु दधिगन्ध B, C.
10. एतत्पंक्तेः परं B पुस्तके "अत्रये ? वास्थिराः सर्व्वा (?) यातुधानाश्च गुह्यकाः। सिद्धादयो वा ये चान्येतान् संपूज्य समापयेत्" इत्यधिकः पाठो दृश्यते।

Q222
N52·2

वायव्यामस्त्रमन्त्रेण गन्धपुष्पैः प्रपूजयेत् ।
वह्निं प्रज्वाल्य विधिना मन्त्रान्[1]सन्तर्प्यः पूजयेत् ॥१८॥
हुत्वा यथोक्तविधिना शान्तितोयं[2] समारभेत् ।
शान्तितोयं ततो गृह्य मन्त्रेण[3] प्रोक्षयेच्छिलाम् ॥१९॥
दर्भैरुल्लेखयेत् पश्चादस्त्र[4]मन्त्रेण तां शिलाम् ।
मन्त्रैरालभ्य तां यत्नाच्छुक्लवस्त्रेण वेष्टयेत् ॥२०॥
रक्षांकृत्वा नृसिंहेन दर्भैराच्छाद्यपूजयेत् ।
[5]गन्धैः पुष्पैश्च नैवेद्यैर्धूपैश्च[5] पूज्य तांशिलाम् ॥२१॥
ततस्तु मूलमन्त्रेण आज्यमष्टशतं हुनेत् ।
ततः पूर्णाहुतिं दद्यान्मन्त्रराजेन[6] वै गुरुः ॥२२॥
एवं समर्प्य[7] संपूज्य विज्ञाप्य च वलिं हरेत् ।
गन्धैः पुष्पैस्तथा धूपैर्दद्याद्भूतवलिं बुधः ॥२३॥
अत्र येऽवस्थिताः सत्वा[8] यातुधानाश्च गुह्यकाः ।
सिद्धादयो वा ये चान्ये तान् संपूज्य क्षमापयेत् ॥२४॥
विष्णुर्विस्वार्थमस्माकं[9] यत्रैषा केशवाज्ञया[10] ।
विष्वर्थं यद्भवेत्[11] कार्य्यंयूयमस्माकमपितद्भवेत्[12] ॥२५॥
अनेन बलिदानेन प्रीता भवथ[13] सर्व्वदा ।
क्षेमेण गच्छतान्यत्र मुक्त्वा स्थानमिदं हर[14] ॥२६॥
एवं प्रबोधिताः सत्वाः परितुष्टा यथासुखम्[15] ।
आचम्य संविश्य ततः कृतरक्षापुरःसरः ॥२७॥

---

1. सन्तर्प्य पूजयेत् A, सन्तर्पयेत्ततः B, C.
2. तोयं A, होमं B, C.
3, अस्त्रैः A, मन्त्रेण B, C.
4, अस्त्रः A, गन्ध B, C.
5..........5. गन्धैः पुष्पैश्च नैवेद्यैर्धूपैश्च A, गन्धपुष्पैश्च नैवेद्यैः B, C.
6. मन्त्रराजेन A, मूलमन्त्रेण B, C.
7. समर्प्य A, सन्तर्प्य B,C.
8. सत्वा A, सर्व्वा B, C.
9. र्थमस्माकम् A न्नमस्काकम् B, C.
10. केशवाज्ञया A, C, केशवादयः B.
11. यद्भवेत् A, अभवत् B, C.
12. युष्माक A, C, B.
13. भवति A, भवथ B, C.
14. हर A, हरं B, C.
15. सुखम् B, C.

चरुं प्राश्य निराहारः शिल्पिभिः सह देशिकः ।
हरिं विज्ञाप्य विधिवद् देवीञ्च कमलोद्भवाम् ॥२८॥
पश्चिमे दर्भशय्यायां वसेत् तां रजनीं गुरुः ।
निराहारः स्थितो भूत्वा प्रमाणारम्भकंजपन् ॥२९॥
ॐ नमः[1] सर्व्वलोकपित्रे विष्णवे प्रभविष्णवे ।
विश्वाय विश्वरूपाय स्वर्गा[2]धिपतये नमः ॥३०॥
आगच्छ देवदेवेश प्रपन्नोऽस्मि तवान्तिकम् ।
स्वप्ने सर्व्वाणि कार्य्याणि हृदिस्थानानि यानि मे ॥३१॥

ॐ हूँ फट् विष्णवे स्वाहा

यदा संपश्यते वृक्षं[3] ज्वलन्तं धूम[4]वर्जितम् ।
फलितं पुष्पितञ्चैव तदा सि[5]द्धिर्न दूरतः ॥३२॥
[6]प्रज्वलन्तीं शिलां पश्येत्श्रिया वाधिष्ठितां शुभाम् ।
ब्राह्मणाधिष्ठितां वापि सा तदा सर्व्वकामदा ॥३३॥
श्रिया जुष्टं प्रज्वलन्तमथ पश्यति पर्व्वतम् ।
ततः प्रवृद्धशिखरं[7] काञ्चनद्रुममण्डितम् ॥३४॥
युतं शैलोद्भवै वृक्षैः फलपुष्पसमन्वितैः ।
एवम्भूते तु स[8]न्दृष्टे स्वप्ने अर्चा[9] सुशोभना[10] ॥३५॥

---

1. B, C पुस्तकयोः नमः इति नास्ति । 2. स्वर्गा A, स्वप्ना B, C.
3. सदा स पश्यते वृक्षं A, यदा संपश्यते वृक्षं B, यदा संपश्यति वृक्षं C.
4. धूमः A, C, भूमि B.
5. B पुस्तके द्धि इति नास्ति, सिद्धि A, C.
6. प्रज्वलतीं शिलां पश्य प्रज्वलन्ती शिला पश्येस्य ? ष्क्रियां वाधिष्ठितां शिलाम् A, प्रज्वलन्तीं शिलां पश्येत् श्रियावाधिष्ठितां शुभाम् C,
7. अत्र "पर्व्व" इत्याधिकं B पुस्तके दृश्यते ।
8. B, C, पुस्तकयोः सम इति नास्ति ।
9. अर्च्चा A, C, चर्चा B. 10. नाः A, न B, ना C.

अपरेऽहनि संप्राप्ते कृतरक्षः कृताह्निकः।
शस्त्राणि विधिवत् पूज्य शिलां[1] पूज्य विधानतः ॥३६॥
अर्घ्यन्दत्वा शिलायान्तु शस्त्रस्मन्त्रेण पूजयेत्।
मन्त्रयित्वा स्वमन्त्रेन प्रज्वलन्तं विभावयेत् ॥३७॥
[2]मध्वाद्याक्तमुखं कृत्वा [2]आत्मानंचिन्तयेद्धरिम्।
शिल्पिनं विश्वकर्माणं ध्यात्वोदक्[3]प्राङ्मुखोऽपिवा॥३८॥
शस्त्रं विश्वात्मकं ध्यात्वा प्रदद्या च्छिल्पिने गुरुः।
मुखं पृष्ठं शिरोमूलं[4] शिल्पिने दर्शयेद्गुरुः ॥३६॥
शुक्लगन्धानुलिप्ताङ्गः स्नातः पुष्पाद्यलंकृतः।
उदङ्मुखः प्राङ्मुखो वा स्थपतिः संयतः शुचिः ॥४०॥
[5]ध्यात्वा स्वदेवतां[6] शिल्पी टङ्कहस्तो जितेन्द्रियः।
यथेष्टं शातयेत्[7] पश्चात् स्वच्छिवां (?) तच्छृणुष्व मे ॥४१॥
उदक्शिरां प्राक्शिरास्वा तथैवेशानदिग्गताम्।
ऊर्द्ध्वभागं भवेत् पृष्ठमधोभागं भवेन्मुखम् ॥४२॥
किञ्चिन्मानाधिकं कृत्वा कल्पयेत् प्रतिमाशिलाम्[8]।
किञ्चिन्मानाधिका त्याज्या[9] विविधाकारपिण्डिका ॥४३॥
छेदयित्वा समूद्धृत्य चतुरस्रन्तु[10] कारयेत्।
अनेनैव विधानेन परीक्ष्य गुणदोषतः[11] ॥४४॥

---

1. B पुस्तके "शिलां पूज्य" इति नास्ति।
2............2. "मध्वाद्यायुक्ते मखं त्वा" इति B, C, पुस्तकयोः पाठः प्रामादिकः।
3. ध्यात्वादक्कं इति B, C, पुस्तकयोः पाठः प्रामादिकः।
4. मूलं A, ह्लुलं A.
5. "ध्यात्वा च वासुदेवं तां शिल्पी टङ्कसुसहस्तः अजितेन्द्रीयः" इति B पुस्तके भ्रान्त पाठो दृश्यते टङ्कसुसहस्त इत्यत्र A, C. पुस्तकयोः टङ्कहस्त इति पाठः।
6. स्वदेवता A, B, स्वदेवतां C.
7. शातयेत् A, छादयेत् B.
8. मा शिलाम् A, C, मा शिवाम् B.
9. त्याजा A, ग्राह्या B, C.
10. न्तु इति B, C. पुस्तकयोः नास्ति।
11. तः A, C, कः B.

वृक्षं यत्नेन गृह्णीयाद् विधिज्ञो देशिकोत्तमः।
समानीय रथे[1] श्रेष्ठं सुशीलैर्वृषभैर्युतम्[2] ॥४५॥
रथे स्थाप्य शिलां यत्नाच्छादयित्वातु वाससा।
हरिं ध्यात्वा स्मरन् मन्त्रमर्घ्यं दद्यात्ततो गुरुः ॥४६॥
आनीयमानेतु रथे रथाङ्ग[3]परिचारके।
वृषभे वा समुत्पन्ने ऽ निमित्तेन साधवः[4] ॥४७॥
वैष्णवाग्नौ नृसिंहेन[5] तिलैर्घृत[6]विमिश्रितैः।
हुत्वा चाष्टशतं सम्यक् तद्दोषेण विमुच्यते ॥४८॥
आनीय शङ्खनिर्घोषै गींतमङ्गलनिःस्वनैः[7]।
प्रासोदस्योत्तरे भागे कृत्वा कर्मकुटीं गुरुः ॥४९॥
शिलां तां स्थाप्य तस्मिंस्तु अर्चयित्वा बलिंहरेत्।
ततः प्रवर्तयेत् कर्म्म विद्वान्[8] विज्ञैस्तु शिल्पिभिः ॥५०॥

इति हयशीर्षे (महा) पञ्चरात्रे द्वादश साहस्रिके
आदिकाण्डे
[षोड़शः]
वनयागपटलः

आदितः श्लोक संख्या—४२७

---

1. रथे A, रथं B, C.
2. वृं क्षतैरिति B पुस्तके पाठः प्रामादिकः।
3. ङ्गपरिचारके A, ङ्गेपरिवारके B, C.
4. साधवः A, साधकः B, C.
5. नृसिंहेन A, C, तु सिंहेन B.
6. र्घृतं वर्द्ध तैः B, C.
7. निःस्वणैं A, C, निःस्वनैं B.
8. विद्वान् इति B पुस्तके पतितः। विद्वान् A, C.

सप्तदशः पटलः

दिक्शान्तिः

विहितायां दिशि शिलानामलाभे शिलाग्रहणविधानम्, भूमिखनने दिङ्निर्णयः, मण्डपनिर्माणम् मण्डपालङ्करणम्, विष्णुपूजनम्, भूतबलिः, होमः, दिग्देवतार्चनम्, शिलोद्धारः, गुरवे धेनु वस्त्रभूषणादिदानम् , शिल्पिप्रीणनम्, विश्वकर्मार्चा, कर्म्मारम्भश्च]

भगवानुवाच

यथोक्तायां दिशायान्तु न यदा लभ्यते शिला ।
तदा विदिक् स्थिता ग्राह्या विधिना येन तच्छृणु ॥१॥
समानीय शिलां सम्यक् पूर्व्वोक्तैर्लक्षणैर्युताम्[1] ।
प्रासादस्योत्तरे भागे खात्वा भूमिं विधानवित् ॥२॥
शिलां संस्थाप्य तत्खाते मृदा संपूरयेद्गुरुः ।
समीकृत्य[2] तु तां भूमिं मण्डपं तत्र कारयेत् ॥३॥
पताकाध्वजपत्राद्यैर्भूषयीत समन्ततः ।
तोरणैः कदलीस्तम्भैर्वितानेन[3] तु भूषयेत् ॥४॥
प्राच्यान्तु भद्रकं[4] लिख्य तत्र विष्णुंयजेद् गुरुः ।
प्रबालमुक्ताफलकै[5]र्हेमपुष्पैः समुज्ज्वलैः ॥५॥
पूर्व्वोक्तं सकलं वापि[6] विधानं समुपाचरेत् ।
भूतक्रू[7]रबलिं दद्यात् पूर्व्वोक्तविधिनैव तु ॥६॥

---

1. पूर्व्वोक्तैर्लक्षणै A, C, पूर्व्वोक्तलक्षणे B.
2. समीकृत्य A, समाहृत्य B, C.
3. विताने (नः) तु A, वितानेन C, वितानमनु B.
4. B पुस्तके "तत्रकं" इति पाठो भ्रान्तः ।
5. फलकै A, वर्णैः B, C.
6. वापि A, चात्र B, C.
7. क A, रे B, रे C.

प्रतीच्यां पूर्व्वविधिना होमं कुर्य्याद्यथोदितम् ।
दिग्दोषपरिशुद्ध्यार्थं विशेषाद्धोममाचरेत् ॥७॥
पातालनरसिंहेन सहस्रं वैष्णवानले ।
दिग्देवानामथाङ्गानां[1] हुत्वा पूजां[3] ददेद्गुरुः ॥८॥
तर्पिते मन्त्रराजे तु दिग्दोषैर्मुच्यते शिला ।
ततः पूर्व्वोक्तविधिना कृत्वा पूजादिकं[2] गुरुः ॥९॥
पूर्व्वोक्तेन विधानेन शिरः पृष्ठादि कल्पयेत् ।
मन्त्रोदकेन संप्रोक्ष्य शिलां[4] तामुद्धरेद्गुरुः ॥१०॥
[5]दिग्दोषप्रशमनार्थं गृष्टिम्भव्यां स्वलंकृताम् ।
सुवर्णशृङ्गसंयुक्तां कांस्यदोहां पयस्विनीम् ॥११॥
ताम्रपृष्ठां सोपवीतां दद्याद् रौप्यखुरां गुरोः ।
तोषयीत गुरुं यत्नाद्वस्त्रालङ्कारकादिभिः ॥१२॥
[6]शिल्पिनं तोषयेदेवं वस्त्रालङ्कारबन्धनैः ।
आचार्य्ये तोषिते विष्णुस्तोषितः स्यान्न संशयः ॥१३॥
शिल्पिनं तोषयेदेवं विश्वकर्मा [7]सुपूजितः ।
ततः कार्याणि कुर्वीत[8] सर्व्वकामप्रदाभवेत्[9] ॥१४॥

इति हयशीर्षे (महा) पञ्चरात्रे द्वादशसाहस्रिके आदिकाण्डे
(सप्तदशः)
दिक्शान्ति पटलः ॥ १७ ॥

आदितः श्लोक संख्या—४४१

---

1. मथाङ्गानां A, यथाज्ञानं B, दिग्देवाय यथाज्ञानं C.
2. पूज्ं A, पूर्णां B, C. 3. पूर्णां A, C, पूज्या B.
4. शिलातां A, C, शिलास्ताः B,
5…………5. प्रदर्शनाथञ्च शुटि भास्या स्वलभ्रत्ता इति B पुस्तक पाठः प्रामादिकः। दिग्दोष प्रशमणार्थं गृष्टिम्भाव्यां स्वलंकृताम् B, युञ्जीत A.
6. पंक्तिरियं A पुस्तके प्रमादप्रतिभैति मन्ये ।
7. विश्वकर्मांसु A, तोषये देवं विश्वकर्मानु B, पूजयेदेवं विश्वकर्लानु B.
8. युञ्जीते A, कुर्व्वीते B, C.
9. कामप्रदा भवेत् A, कर्मप्रदापयेत् B, C.

अष्टादशः पटलः

प्रतिमालक्षणम्

तत्रादौ प्रतिमानिर्म्माणाय कर्मकुटीस्थाननिर्णयः, शिलास्थापनम्, शिलागात्रे शिरः प्रभृति-नामङ्कनम्, शिलास्थापने दिग्विचारः, बलिदानम्, नूतनारम्भे पूजाविधानम्, पूजा मन्त्राः गुरुद्विजार्च्चनम्, सूत्रधारणम्, शस्त्रेण शिलोत्किरणम्, प्रतिमाङ्गानां स्थानविशेषे सूत्रपरिमाणम्, सूत्रधारणस्थानकथनम्, प्रतिमाङ्गभेदे परिमाणभेदाश्च]

भगवानुवाच

अतःपरं प्रवक्ष्यामि प्रतिमालक्षणं परम् ।
यन्न कस्यचिदाख्यातं गुह्याद्गुह्यतरं परम् ॥१॥
प्रासादस्योत्तरे भागे शिलां नीत्वा तु देशिकः ।
कृत्वा कर्मकुटीं रम्यां प्रतिमाकर्म कारयेत् ।२॥
चतुरस्रायतां[1] कृत्वा शिलां संस्थाप्य चार्च्चयेत् ।
शिरो मुखञ्च पृष्ठञ्च अङ्कयित्वा तू बुद्धिमान् ॥३॥
यजमानानुकूलेन गुरुः कर्म समारभेत् ।
शिलां पूर्व्वाननां कृत्वा अथवा[2]चोत्तराननाम् ॥४॥
तोयेन ब्रह्मघोषाद्यैः स्थाप्य पश्चाद् बलिंहरेत् ।
दधिदुर्व्वाक्षतैः पूजां नवारम्भे समाचरेत् ।
शुक्लैर्गन्धैश्च माल्यैश्च मन्त्रेणानेन देशिकः ।५॥

तद्यथा । ॐ तत्सन्नमः । योऽसौ[3] भगवान् सर्व्वजगत्प्रवीर सङ्कर्षणो बासुदेवः । प्रवरवराहत[4] जय जय सुप्रतिष्ठितः कीर्ति प्रवर्द्धयस्व ॐ ॐ[5] फट्[6] फट् नमः ।

---

1. चतुरस्रायतं A, चतुरस्रायतां B, C. 2. उत्तरा A, चोत्तरा B, C.
3. योऽसौ A, ममावासौ B, C. 4. B, C. पुस्तकयोः त नास्ति ।
5. B पुस्तके ॐङ्कारत्रयं । C पुस्तके A ओङ्कार ।
6. B पुस्तके "फट्" इत्यधिकम् । चतुष्कं वर्त्तते । फट् फट् A, C.

स्वस्तिवाच्य द्विजान् पूज्य गुरुं भक्त्या समर्च्चयेत् ।
वस्त्रपुष्पादिदानेन अशाष्ठेन[1] तु पूजयेत ॥६॥
मङ्गलैर्ब्रह्मघोषाद्यैः प्रतिमां संविभाजयेत् ।
मध्यसूत्रं[2] समास्फाल्य[3] तीक्ष्णशस्त्रेन चोत्किरेत् ॥७॥
अभिप्रेतप्रमाणन्तु नवधा प्रविभाजयेत्[4] ।
नवमे[5] भास्करैर्भक्ते[6] भागं स्वाङ्गुलमुच्यते[7] ॥८॥
[8]द्व्यङ्गुलं गोलकं नाम्ना कलानेत्रं तदुच्यते ।
भागमेकं त्रिधा भक्तां पार्ष्णिभागं प्रकल्पयेत् ॥९॥
भागमेकं तथाजानौ ग्रीवायाश्भागमेव च ।
मुकुटं भालमात्रं स्यात् भालमात्रं तथामुखम् ॥१०॥
तालमात्रेण कण्टन्तु तालेन हृदयं तथा ।
[9]नाभिमेढ्रान्तरं तालं द्वितालावुरुकौ तथा ॥११॥
तालद्वयेन जङ्घातु सुत्रानि श्रृणु साम्प्रतम् ।
कार्य्यं सूत्रद्वयं पादे जङ्घामध्ये तथापरम् ॥१२॥
जानौ सुत्रद्वयं कार्य्यमुरुमध्ये तथापरम् ।
मेढ्रे तथापरं कार्य्यंकट्यां सूत्रं[10] तथापरम् ॥१३॥
[11]मेखलाबन्धसिद्धार्थं नाभ्याश्चैवापरा तथा ।
हृदये च तथा कार्य्यं कण्ठे सूत्रद्वयन्तथा[11] ॥१४॥
ललाटे चापरं कार्य्यं मस्तके च तथापरम् ।
मुकुटोपरि कर्त्तव्यं सूत्रमेकं विचक्षणैः ॥१५॥

---

1. अशोच्येन B, अशाठ्येन A, C. 2. सूत्रं A, सूक्त B, C.
3. समस्फोन्य B, समास्फाल्य A, C. 4. प्रवि A, परि B, C.
5. नमसे A, नवमे B, C. 6. भास्करे भक्ते B, भास्करैर्भक्ते A, C.
7. स्वाङ्गुल A, साङ्गुल B, C. 8. श्लोकांशोऽयं B, C, पुस्तकयोर्नास्ति !
9. इतःपरं B, C पुस्तकयोः "हृदये च तथा कार्य्यं कण्ठसूत्रद्वयन्तथा" इति श्लोकांशो वर्त्तते ।
10. सूत्रद्वयन्तथा B, सूत्रंतथापरम् A, C.
11..............11. श्लोकऽयं B, पुस्तके न लभ्यते, A, C. पुस्तकयोर्लभ्यते च ।

सूत्रान्यूर्द्ध्वं प्रदेयानि सप्तैव सुरसत्तम ।
कक्षात्रिकान्तरैनैव पटसूत्रानि दापयेत् ॥१६॥
मध्यसूत्रानि[2] संत्यज्य[3] सूत्रान्येवं निवेदयेत्[4] ।
ललाटे नासिकावक्त्रं कर्त्तव्यं चतुरङ्गुलम् ॥१७॥
ग्रीवाकर्णन्तु[5] कर्त्तव्यमायामाच्चतुरङ्गुलम् ।
द्व्यङ्गुले हनूके कार्ये विस्ताराच्चिबुकन्तथा ॥१८॥
अष्टाङ्गुलं ललाटेतु विस्तारेण प्रकीर्त्तितम् ।
परेण द्व्यङ्गुलौ शङ्खौ कर्त्तव्यावलकान्वितौ ॥१६॥
चतुरङ्गुलमाख्यातमन्तरं[6] कर्णनेत्रयोः ।
द्व्यङ्गुलौ पृथुकौ कर्णौ कर्णार्द्धाङ्गश्च पञ्चमे ॥२०॥
भ्रुमेन तु सूत्रेन कर्णश्रोत्रं[7] प्रकीर्त्तितम् ।
विद्धं षडङ्गुलं कर्णं[8] विद्धश्च चतुरङ्गुलम् ॥२१॥
चिवुकेन समं विद्धमविद्धस्त्वा षडङ्गुलम् ।
खड्गपात्रं तथावर्त्तिं शष्कुलीं कल्पयेत्तथा ॥२२॥
अङ्गुलेनाधरः कार्य्यस्तस्यार्द्धेनो[9]त्तराधरम् ।
अर्द्धाङ्गुलं तथा गोजी वक्त्रन्तु चतुरङ्गुलम् ॥२३॥
आयामेन[10] तु वैपुण्यात् सार्द्धमङ्गुलमुच्यते ।
अव्यात्तमेवं स्याद्वक्त्रं व्यात्तं द्व्याङ्गुलमुच्यते ॥२४॥
नासावंशसमुच्छ्रायं मूले त्वेकाङ्गुलंमतम् ।
उच्छ्रिता[11]द्व्यङ्गुलं चाग्रेकरवीरोपमा[12] स्मृता ॥२५॥

---

2. मध्ये सूत्रानि B, मध्यसूत्रानि A, C.
3. सन्त्यज्य A, संयोज्य B, C. 4. निवेदयेत् A, निवेशयेत् B, C.
5. ग्रीवाकर्णन्तु कर्त्तव्यं A, ग्रीवांकर्णौ तु कर्त्तव्यौ B, C.
6. मन्तरं A, C, कर्त्तव्यं B. 7. श्रोत्रः A, श्रोत्रं B, C.
8. कर्णं विद्धश्च A, B, कर्णमविद्धं C. 9. स्तस्यार्द्धे A, B, स्तयार्द्धे C.
10. आयामेन A, C, अगमोमेन ? B. 11. भद्रिका A, उच्छ्रिता B, C.
12. करवीरोपमा A, करवीकोपमा B, C.

अन्तरं चक्षुषोः कार्य्यश्चतुरङ्गुलमानतः।
द्वयङ्गुलश्चाक्षिकोषश्च[1] द्वयङ्गुलश्चान्तरन्तयोः[2] ॥२६॥
तारानेत्रविभागेन द्वक्तारापञ्चमांशिका।
अंगुलं नेत्रविस्तारं द्रोणी चार्द्धांगुला[3] मता ॥२७॥
तत्प्रमाना भ्रुवोर्लेखा भ्रुवौ नेत्रसमे मते।
भ्रुमध्यं द्वयङ्गुलं कार्य्यं भ्रुदैर्घ्यं चतुरंगुलम् ॥२८॥
षट्त्रिंशद्द्वयङ्गुलंयामं[4] मस्तकस्य तु वेष्टनम्।
मूर्त्तीनां केशवादीनां द्वात्रिंशद्वेष्टनं भवेत् ॥२६॥[5]
पञ्च नेत्रात्त्वधो ग्रीवाविस्ताराद्व वेष्टनं पुनः[6]।
ग्रीवात्रिगुणमायामं[7] ग्रीवावक्षोऽन्तरम्भवेत् ॥३०॥
स्कन्धावष्टांगुलौ कार्य्यौ त्रिकलावंशकौशुभौ।
गुप्तनेत्रौ स्मृतौ[8] वाहू प्रवाहू षोड़शांगुलौ ॥३१॥
त्रिकलस्विस्तृतौ वाहू प्रवाहू चापितत्समौ[9]।
वाहुर्दण्डार्द्धतो[10] ज्ञेयः परिनाहः[11] कलानवः ॥३२॥
सप्तदशांगुलौ[12] मध्ये कूर्परोर्द्धेव् च षोड़श।
कूर्परस्य भवेन्नाहस्त्रिगुणः सुरसत्तम ॥३३॥
नाहप्रवाहमध्ये तु षोड़शांगुलमुच्यते।
अग्रहस्ते[13] परीनाहो[14] द्वादशांगुलमुच्यते ॥३४॥

---

1. कोषश्च A, कोषन्तं B, C. 2. चान्तरंतयोः A, चातुरन्तयोः B, C.
3. चार्द्धाङ्गुला A, C, च द्व्यङ्गुला B.
4. षट्त्रिंशदङ्गुलायामं A, षट्द्वयङ्गुलकमायामं B, C.
5. इतःपरं B, C पुस्तकयो.द्विगुणन्तु भवेदूर्द्धं विस्तृताष्टाङ्गुलं पुनः" इत्यधिकः पाठो दृश्यते। 6. पुनः A, भवेत् B, C.
7. ग्रीवाभि B, ग्रीवात्रि A.C. 8. गुप्तनेत्रौ A, सप्ततालौ B, C.
9. च षड़ङ्गुलौ B, चापि तत्समौ A, C.
10. दण्डा A, दण्डो B, C. 11. णाहः A, वर्णाद B, C.
12. दण्डा A, दशा B, C. 13. अर्द्धहस्तो B, अग्रहस्ते A, C.
14. हो B, हो A, C.

विस्तारेण करतलं कीर्त्तितन्तु षडङ्गुलम् ।
दैर्घ्यात् सप्ताङ्गुलं कार्य्यं[1] मध्यापञ्चाङ्गुलम्मता ॥३५॥
तर्जन्यनामिका चापि तस्मादर्द्धाङ्गुलं विना ।
कनिष्ठाङ्गुष्ठकौ कार्य्यौ चतुरङ्गुलसम्मितौ[2] ॥३६॥
द्विपर्व्वाङ्गुष्ठकः कार्य्यः शेषाङ्गुल्यस्त्रिपर्व्विकाः ।
सर्व्वासां पर्व्वनोर्द्ध्वेन[3] नखमानं विधीयते[4] ॥३७॥
वक्षसो यत्प्रमाणञ्च[5] जठरन्तत् प्रमाणतः ।
अङ्गुलैकं[6] भवेन्नाभी (भिः) वेधेन च प्रमाणतः ॥३८॥
नाभिमध्ये परीनाहो द्विचत्वारिंशदङ्गुलैः ।
अन्तरं स्तनयोः कार्य्यं तालमात्रं प्रमानतः ॥३९॥
चिबुकौ पर्व्वमानौ तु मण्डलंद्विपरं[7] भवेत् ।
चतुःषष्ठ्यङ्गुलं कार्य्यंवेष्टनं वक्षसः स्फुटम् ॥४०॥
चतुर्मुखन्तु तदधो वेष्टनं परिकीर्त्तितम् ।
परिनाहस्तथा कट्यां चतुःपञ्चाशदङ्गुलैः ॥४१॥
विस्तारश्चोरुमूले तु प्रोच्यते द्वादशाङ्गुलः ।
तस्मादभ्यधिकं मध्ये ततो निम्नतरं[8] क्रमात् ॥४२॥
विस्तृताष्टाङ्गुलं जानु त्रिगुणं[9] परिनोहतः ।
जङ्घामध्ये तु विस्तारः सप्ताङ्गुल उदाहृतः ॥४३॥
त्रिगुना परिधिश्चास्य जङ्घाग्रं पञ्च विस्तरात् ।
त्रिगुणं परिधिश्चास्य पादौ तालप्रमाणकौ ॥४४॥

---

1. कार्य्य A, कार्य्यं B, C.
2. सम्मितौ A, समन्विनौ B, C. 3. पवनो A. पर्व्वणो B, C.
4. ते B. 5. यत् प्रमाणकम् A, तत्प्रमाणतः B, C.
6. "ततो नेत्रान्तर कार्य्यं तालमात्रं प्रमाणतः" इति B. C पुस्तकयोयधिकः पठ्यते। नेत्रान्तमित्यत्र नेत्रान्तरमिति C पुस्तके पाठभेदः।
7. द्विपर्व्वं A, द्विपरं B, C. 8. निम्नतरं A, B, निम्नतरं C.
9. त्रैगुणा A. त्रिगुणः B. C.

आयामादुच्छ्रितौ पादौ चतुरङ्गुलमेव च ।
गुल्फात् पूर्व्वन्तु कर्त्तव्यं प्रमाणाच्चतुरङ्गुलम् ॥४५॥
त्रिकलं विस्तृतौ पादौ [1]द्व्यङ्गुलोऽङ्गुष्ठकः स्मृतः ।
पञ्चाङ्गुलन्तु नाहोऽस्य दीर्घं [2]चास्य प्रदशिनी ॥४६॥
अष्टमांशोऽष्टमांशो न [3]शेषाङ्गुल्यः क्रमेण तु ।
सपादाङ्गुलमुत्सेध[4]मङ्गुष्ठस्य प्रकीर्त्तितम् ॥४७॥
पादोनमङ्गुलं कार्य्यमङ्गुष्ठस्य नखः [5]सदा ।
अर्द्धाङ्गुलं तथा [6]नासा-क्रमादूनन्तु कारयेत् ॥४८॥
[7]द्व्यङ्गुलौ वृषणौ कार्य्यौ मेढ्रन्तु चतुरङ्गुलम् ।
परिनाहेन कोषाग्रं कर्त्तव्यं चतुरङ्गुलम् ॥४९॥
षडङ्गुलपरिनाहौ वृषणौ परिकीर्त्तितौ ।
वृषणालंकृता कार्य्या प्रसन्नवदनेक्षना ॥५०॥
प्रतिमा वासुदेवस्य मानेन सुरसत्तम ।
एतत्ते लक्षणं प्रोक्तमुद्देशेन मयानघ ॥५१॥
अनयैव दिशा कार्य्यं स्वयमभ्युक्ष्यदेशिकै ।
लोकेषु लक्षणं द्रष्ट्वा हसिताद्यं निरीक्षणम् ॥५२॥
तथातथैव कर्त्तव्यं सूरं यत्नेन देशिकैः ।
वासुदेवन्तु कुर्व्वीत चतुर्वाहुं सुरेश्वरम् ॥५३॥
दक्षिणोपरि चक्रन्तु पद्मञ्चाधः प्रकल्पयेत् ।
वामोपरि गदा कार्य्या शङ्खञ्चाधः सुशोभनम् ॥५४॥
एतल्लक्षणसंयुक्ता प्रतिमा सन्निधाभवेत् ।
[9]श्रीपुष्टी चापि कर्त्तव्ये पद्मबीनाकरान्विते ॥५५॥

---

1. द्व्ङ्गुलो A, त्र्यङ्गुलो B, C.
2. चास्य A, तद्वत् B, C.
3. शषाङ्गुल्यः A, B, शेषाङ्ग C.
4. मङ्गुःस्य A, अङ्गुःस्य B, C.
5. नखः मदा A, नखामदा B, C.
6. न्यासं A, B, नासा C.
7. द्व्ङ्गुलो A, अङ्गुष्ठो B, C.
8. श्रीयुष्टा B, श्री पुष्टी A, C.

[1]उरुमात्रोच्छ्रितायामे किञ्चिदावर्जिते तथा।
माला[2]विद्याधरौ कार्य्यौ प्रभामण्डलसंस्थितौ ॥५६॥
प्रभां विभूषयेद् यत्नाद् गजव्यालादिभिर्बुधः।
पद्माभं पादपीठन्तु यथा शोभासमन्वितम्।
देश[3]देशा(देशादर्शा)नुरूपेण कर्त्तव्यं देशिकोत्तमैः ॥५७॥

इति हयशीर्षं (महा) पञ्चरात्रे द्वादशसाहस्रिके आदिकाण्डे
(अष्टादश)
प्रतिमालक्षण पटलः

आदितः श्लोक-संख्या—४६८

———

1. उरु A, तरु B, C.
2. विद्या A, वेद्या B, C.
3. देशा A, दशा B, C.

ऊनविंशः पटलः

पिण्डिकालक्षणम् पिण्डिकाभेदाश्च

भगवानुवाच

अतःपरं प्रवक्ष्यामि पिण्डिकालक्षणं तव।
उच्छ्रायं प्रतिमार्द्धश्च[1] दैर्घ्येण प्रतिमा समा ॥१॥
चतुःषष्टिपुटान्[2] कृत्वा पिण्डिकांतत्र कल्पयेत्।
त्यक्त्वा पंक्तिद्वयं चाधस्तदूर्द्ध्वं यत्तु कोष्ठकम् ॥२॥
समन्तदुभयोः[3] पार्श्वे अनन्तं परिमार्जयेत्।
ऊर्द्ध्वपंक्तिद्वयं त्यक्त्वा अधस्ताद्वर्णं[4] कोष्ठकम् ॥३॥
अन्तस्थं मार्जयेद् यत्नात् पार्श्वयोरुभयोः समम्।
तयोर्मध्यगतौ तत्र चतुष्कौ मार्जयेत्ततः ॥४॥
चतुर्द्धा भाजयित्त्वा तु ऊर्द्ध्वपंक्तिद्वयं बुधः।
मेखला भागमात्रा[5] स्यात् खातं तस्यार्द्धमानतः[6] ॥५॥
भागं[7] भागं परित्यज्य पार्श्वयोरुभयोः[6] समम्।
दत्त्वा चैकं पदं बाह्ये प्रमाणं कारयेद् बुधः ॥६॥
त्रिभागेन च भागः स्यादग्रे[8] स्यात् तोयनिर्गमः।
नानाप्रकारभेदेन भद्रेयं पिण्डिका शुभा ॥७॥

इति हयशीर्षे (महा) पञ्चरात्रे द्वादश साहस्रिके आदिकाण्डे
ऊनविंशः
पिण्डिकालक्षणपटलः ॥ १९ ॥

आदितः श्लोक-संख्या—५०५

---

1. श्च A, न्तु B, C.
2. पुटान A, पदान B, C.
3. समन्त A, समत्व B, C.
4. अधस्तादवर्ण A, अधस्तद्वह्नु B, C.
5. भागमात्रा A, B, भागमात्रं C.
6. खातंतस्या A, C, खण्डितस्या B.
7. भागं A, चाग्रं B, C.
8. समम् A, रपि B, C.
9. ग्रे A, ग्रे B, C.

विंशः पटलः

श्रीलक्षणम्

भगवानुवाच—[1]

अतःपरं प्रवक्ष्यामि लक्ष्मीलक्षणमुत्तमम् ।
अष्टताला तु कर्त्तव्या देवी लक्ष्मीः[2] सुरेश्वरी ॥१॥
तत्क्रमं सौर[3]काण्डे तु कथयिष्ये तवानघ[4] ।
नवतालिकक्षेत्रन्तु कथ्यमानामितः शृणु ॥२॥
भ्रूवौ यवाधिके कार्य्ये यवहीना तु नासिका ।
गोलकेनाधिकं वक्त्रमूर्द्धवं तिर्य्यग्विवर्जितम् ॥३॥
आयते नयने कार्य्ये त्रिभागोनैर्य्यवै[5]स्त्रिभिः ।
तदर्द्धेन तु वै पुण्यं नेत्रयोः परिकल्पयेत् ॥४॥
कर्णपाशोऽधिकः कार्य्यः सृक्किण्या समसूत्रितः ।
नम्रं कलाविहीनन्तु कुर्य्यादंशद्वयं सदा ॥५॥
ग्रीवा सार्द्धकला कार्य्यातद्विस्तारोपशोभिता ।
नेत्रस्त्विना तु विस्तार[6] उरू[7] जानू च पिण्डिका[8] ॥६॥
अङ्घ्रिपृष्ठे स्फिचे कस्यां यथायोगं प्रकल्पयेत् ।
सप्तांशोनास्ताथाङ्गुल्यः दैर्घ्याद् विस्क(म्भ)? ना द्रुतः ॥७॥
नेत्रेकवर्जितायामो जङ्घोरु च तथा कटिः ।
मध्यं पार्ष्णि[9] तद्वृत्तं घनं पीनं कुशद्वयम् ॥८॥

---

1. भगवानुवाच इति A पुस्तके नास्ति B, C, पुस्तकयोरस्ति ।
2. लक्ष्मी A, B, लक्ष्मी C.
3. गौर B, गौर A, C.
4. तवा A, तदा B, C.
5. र्यंवं A, र्यंवै B, C.
6. विस्तारे A, विस्तार B, C.
7. ऊरू जानू A, B, उरु जानु C.
8. विस्कम्भनाहः A, विस्कणाहत B, D.
9. मध्यं पार्श्वञ्च A, C, मध्यपार्श्वञ्च B.

तालमात्रौ स्तनौ कार्य्यौ कटिः सार्द्धकलाधिका।
शेषमन्यद् यथोद्दिष्टं लक्ष्मी चेयं प्रकीर्त्तिता ॥९॥
सर्व्वाभरण सम्पन्ना मध्ये क्षामा स्तनोन्नता[1]।
श्रोणितटसुविस्तीर्णा कार्य्या देवी सुरेश्वरी ॥१०॥
द्विभुजा कम्बुग्रीवा च विशालाक्षी सुलक्षणा।
स्तनौ समुन्नतौ कार्य्यौ कंचुकेनावगुण्ठितौ ॥११॥
नागहस्तोपमौ[2] बाहू उरू रम्भासमौ शुभौ।
नानारत्नोज्ज्वलं पट्टं देव्याः शिरसि दापयेत् ॥१२॥
नानारत्नोज्ज्वलो देव्या मेखला श्रोणिसंयुता[3]।
युक्ता दिव्येन हारेण केयूरकटकोज्ज्वला ॥१३॥
पद्मासना तु कर्त्तव्या पद्मश्रीफलपानिका[4]।
दक्षिणे पुण्डरीकन्तु वामहस्ते तु श्रीफलम् ॥१४॥
स्थिता वा त्रिवलीभङ्ग्योतिता[5] वा प्रशस्यते।
स्त्रियौ पार्श्वद्वये कार्य्ये शुभे चामरहस्तिके[6] ॥१५॥
भृङ्गारहस्तौ द्वौ नागौ स्नपयन्तौ[7] श्रियं स्थितौ।
श्रीरियं लक्ष्मणोपेता स्थापिता सर्व्वकामदा[8]।
सर्वासामेव देवीनामेतत् साधारणं स्मृतम् ॥१६॥

इति हयशीर्षे (महा) पञ्चरात्रे द्वादशसाहस्रिके आदिकाण्डे
विंशः
श्रीलक्षणपटलः ॥ २० ॥

आदितः श्लोक-संख्या—५२१

---

1. स्तनोन्नता A, तनोन्नता B, C.
2. हस्तोपमौ A, हस्तौपरौ B, C.
3. संयुता A, संयुतम् B, C.
4. पालिका A, B, पानिका C.
5. त्रिवलीतस्थशोभिता A, त्रिवली द्यो तिता B, C.
6. हस्तिके A, हस्तके B, C.
7. स्नापयन्तौ श्रियं स्थितौ A, स्थापयन्तौ श्रियं श्रितौ B, C.
8. सर्व्वकामदा A, कामदा सदा B, C.

एकविंशः पटलः

(वैनतेयलक्षणम्)

खगेशस्य प्रवक्ष्यामि तव रूपं सुशोभनम्।
नरतुल्यं भवेद्गात्रं नासिका कं[1]चुकान्विता ॥१॥
षडङ्गुलोच्छ्रया[1] सम्यक् चंचुरुपेण कल्पिता।
मस्तके कुटिलं[2] केशं नेत्रे चैवास्य वर्त्तुले ॥२॥
आयतौ द्विमुखौ चास्य कार्य्यौ पक्षौ सुशोभनौ।
स्कन्धप्रदेशसंलग्नौ ज्वलदग्निसमप्रभौ[3] ॥३॥
पादयोर्नखराः कार्य्याः सर्पकुण्डलमण्डिताः।
नूपुरौ तस्य द्वौ नागौ[4] केयुरौ पद्मकरुघनौ ॥४॥
कटिदेशेऽस्य कुलिकं परिधानस्य वेष्टनः।
वृश्चिकैः कर्णिका[5] कार्य्या गरुडस्य महात्मनः ॥५॥
देवस्य पूरतः स्थाप्यो[6] यष्ट्यास्वा मण्डलेऽथवा[7]।
प्रासादस्य प्रमाणेन कार्य्यो गरुड़मण्डपः।
यष्ट्याः समुच्छ्रयः कार्य्यः प्रासादायामतोऽर्द्धतः[8] ॥६॥

इति हयशीर्षे (महा) पञ्चरात्रे द्वादश साहस्रिके
प्रतिष्ठापञ्चके प्रथमकाण्डे
[एकविंशः]
वैनतेयलक्षण पटलः ॥२१॥
आदितः श्लोक-संख्या—५२८

———

1........1. B, C पुस्तकयोर्नास्ति 2. मुकुरं A, कुटिलं B, C.
3. समप्रभौ A, B, समन्वितौ C. 4. नागौ A, कार्य्यौ B, C.
5. कर्निका A, C, कालिका B. 6. स्थाप्यो A, स्थाप्या B, C.
7. मण्डलेऽथवा A, मण्डपे तथा B, C.
8. प्रसादस्यमतोद्धतः इति B, C पुस्तक पाठो भ्रान्तः।

द्वाविंशः पटलः

[वासुदेव—नारायण—माधव—गोविन्द —विष्णु—मधुसूदन—त्रिविक्रम—वामन श्रीधर—हृषिकेश—पद्मनाभ—दामोदरेत्यादीनां मासाधिपतीनां लक्षणानि ।]

भगवानुवाच

अत ऊर्द्ध्वं[1] प्रवक्ष्यामि प्रतिमालक्ष्मणं पुनः ।
मासाधिपानां संक्षेपात् तन्निकोध सुरोत्तम ॥१ ॥
आदिमूर्त्तिर्वासुदेवः[2] सङ्कर्षणमथापि च[3] ।
*चतुर्मूर्त्तिः परं प्रोक्त[4] एकैको भिद्यते त्रिधा ॥२॥
केशवादिप्रभेदेन मूर्त्तिद्वादशकं स्मृतम् ।
पङ्कजं दक्षिणे दद्यात् पाञ्चजन्यं तथोपरि ॥३॥
वामोपरि गदा यस्य चक्रञ्चाधो व्यवस्थितम् ।
आदिमूर्त्तेस्तु भेदोऽयं केशवेति प्रकीर्त्यते ॥४॥
अधरोत्तरभागेन[5] कृतमेतत् तु यत्र वै ।
नारायणाख्या सा मूर्त्तिः स्थापिता भुक्तिमुक्तिदा ॥५॥
सव्याधः पङ्कजं यस्य पाञ्चजन्यं तथोपरि ।
दक्षिणोर्द्ध्वं गदा यस्य चक्रञ्चाधो व्यवस्थितम् ॥६॥
आदिमूर्त्तेस्तु भेदोऽयं माधवेति[6] प्रकीर्त्तितम् ।
दक्षिणाधः स्थितं चक्रं गदा यस्योपरि स्थिता ॥७॥
वामोर्द्ध्वसंस्थितं[7] पद्मं शङ्खञ्चाधो व्यवस्थितम् ।
सङ्कर्षणस्य भेदोऽयं गोविन्देतिप्रकीर्त्यते ॥८॥

---

1. ऊर्द्धमिति B, C पुस्तकयोः पतितम् ।
2. र्वासुदेवः A, B, र्वसुदेव C. सूज ? C.
3. चतुर्मूर्त्तिपरम् A, चतुर्मूर्त्तिः परम् B, C. 4. प्रोक्तं B, प्रोक्त A, C.

* इतः पूर्व्वं B, C पुस्तके "सङ्कर्षणोथ प्रद्युम्नसोनिरुद्धमथासृजत्" इत्यधिक पाठः दृश्यते ।

5. अधरोत्तरभावेन A, अथ चोत्तरभागेन B, C.
6. माधवोयं A, माधवेति B, C. 7. वामोर्द्ध्वं B, वामोर्द्ध A, C.

दक्षिणोपरिपद्मन्तु गदाचाधो व्यवस्थिता ।
वामोर्द्ध्वं पाञ्चजन्यञ्च[1] चक्रञ्चाधो व्यवस्थितम् ॥९॥
सङ्कर्षण प्रभेदोऽयं[2] विष्णुरित्यभिधीयते[3] ।
दक्षिणोपरि शङ्खञ्च[4] चक्रञ्चाधः प्रदृश्यते ॥१०॥
वामोपरि तथा पद्मं गदा चाधः प्रदृश्यते[5] ।
मधुसूदननामायं भेदः सङ्कर्षणस्य तु ॥११॥
दक्षिणोर्द्ध्वं गदा यस्य पङ्कजञ्चाप्यधः स्थितम्[6] ।
वामोर्द्ध्वं संस्थितं चक्रमधः शङ्खः[7] प्रदृश्यते ॥१२॥
ब्रह्मागण्डं[8] वामपादं दक्षिणं शेषपृष्ठगम् ।
वलिवञ्चन संयुक्त[9]वाम (न)[10] ञ्चाप्यधःस्थितम् ॥१३॥
त्रिविक्रमेति सा मूर्त्तिः स्थापिता राज्यभोगदा ।
वामोर्द्ध्व[11] कौमुदी यस्य पुण्डरीकमधः स्थितम् ॥१४।
दक्षिणोर्द्ध्वं सहस्रारं पाञ्चजन्यमधः स्थितम् ।
सप्ततालप्रमाणन्तु वामनं कारयेत् सदा ॥१५॥
ऊर्द्ध्वं दक्षिणतश्चक्रमधः पद्मं व्यवस्थितम् ।
वामोर्द्ध्वं कौमुदी यस्य पाञ्चजन्यमधः स्थितम् ॥१६॥
पद्मा पद्मकरा वामे पार्श्वे यस्य व्यवस्थिता ।
स्थितो वाप्युपविष्टो वा सानुरागो विलासवान् ॥१७॥
प्रद्युम्नस्य हि भेदोऽयं[12] श्रीधरेति प्रकीर्त्त्यते ।
दक्षिणोर्द्ध्वं महाचक्रं कौमुदी तदधःस्थिता ॥१८॥

---

1. ञ्च A, न्तु B, C.
2. स्य भेदोऽयं A, प्रभेदोऽयं B,C.
3. धीयते A, B, शस्यते C.
4. शङ्खञ्च A, B, शङ्खन्तु C.
5. प्रदृश्यते A, प्रशस्यते B, C.
6. ञ्चाप्यधःस्थितम् A, श्चाप्यधःस्थितः B, C.
7. शङ्खं A, शङ्खः B, C.
8. गण्डं A, शुगं B, C.
9. संयुक्त A, संयुक्तं B, C.
10. वारण A, वाम [नः] B, C.
11. वामोर्द्ध A, B, वानोर्द्धं C.
12. हि भदोऽयं A, B, प्रभेदोऽयं C.

वामोर्द्ध्व् नलिनं यस्य अधः शङ्खं विराजते।
हृषिकेशेति विज्ञेयः स्थापितः सर्व्वकामदः ॥१६॥
दक्षिणोर्द्ध्व्[1] पुण्डरीकं पाञ्चजन्यमधस्तथा।
वामोर्द्ध्व् संस्थितं चक्रं कौमुदी तदधःस्थिता ॥२०॥
पद्मनाभेति सा मूर्त्तिः स्थापिता मोक्षदायिनी।
दक्षिणोर्द्ध्वं[2] पाञ्चजन्यमधस्तात्तु कुशेशयम् ॥२१॥
सव्योर्द्ध्वं कौमुदी देवी हेतिराज[3]मधःस्थितम्।
अनिरुद्धस्य भेदोऽयं दामोदर इति स्मृतः ॥२२॥
एतेषान्तु स्त्रियौ[4] कार्य्यें पद्मवीणाधरे शुभे।
एतत् समासतः प्रोक्तं मूर्त्तिनां लक्षणं मया।
मत्स्यादीनां प्रवक्ष्यामि विशेषेण तु लक्षणम् ॥२३॥

इति हयशीर्षे (महापञ्चरात्रे द्वादश साहस्रिके
आदिकाण्डे
(द्वाविंशः)
केशवादि प्रतिमा लक्षण पटलः ॥२२॥

आदितः श्लोक-संख्या—५५१

———

1. दक्षिणोर्द्ध्वं A, B, दक्षिणोर्द्ध्वं C.
2. दक्षिनार्द्ध्वं A, B, दक्षिणोर्द्ध्वं C.
3. हेंतिराज A, B, हेतिराज इति C पुस्तके नास्ति।
4. स्त्रियौ A, मूर्त्तिपे B, C.

त्रयोविंशः पटलः

[दशावतार प्रतिमालक्षनम्]

[मत्स्य—कूर्म—नृसिंह—जामदग्न्य—राम—बलदेव—बुद्ध—कल्कि—वामन (?)
प्रभृतिनां दशानामवतारानां लक्षणानि]

भगवानुवाच

अतःपरं प्रवक्ष्यामि मत्स्यादीनान्तु लक्षणम्।
षट्त्रिंशदङ्गुलाया म[1]मूर्द्धेव्न तु सु विस्तृतम् ॥१॥
दैर्घ्याष्टमांशसं[2]युक्तं पुच्छवक्त्रन्तु कारयेत्।
रोहितं[3] विवृतास्यन्तु द्वादशाङ्गुलमानतः[4] ॥२॥
कलैकं पृ[5]ष्ठरोमन्तु पुच्छोर्द्ध्व् क्रोडगन्तथा।
कृतस्यैवं विधस्येह रोहितस्य मु[6]खोद्गतम् ॥३॥
नारायणन्तु कुर्व्वीत आगुल्फं त[7]न्मुखोद्गतम्।
[8]एवन्तु मत्स्यमा[9]स्यस्वा स्थापयेद् यस्तु मानवः ॥४॥
सर्व्वज्ञत्वं भवेत्तस्य सर्व्वापन्मुक्तिरेव च।
दैर्घ्यात् [10]त्रितालसंयुक्तं तदर्द्धपरिमण्डलम् ॥५॥
चतुश्चरण सुश्लिष्टश्चतुरङ्गुलमात्रया।
[11]कपोलाद्धयमध्यात्तु गोविन्दन्तु समुद्गतम् ॥६॥
कृत्वा [12]वा गुल्फपर्य्यन्तमुद्गच्छन्तं सुरोत्तम।
[13]भृदुवर्मं (?) कारयि[14]त्वैवं कूर्मस्वा स्थापयीत यः ॥७॥

---

1. तदर्द्धेन तु विस्तृतम् A, ऊर्द्धेन तु सुविस्तृतम् B, C.
2. संयुक्तं A, संयुक्ता B, C.
3. रोहिता A, रोहितं B, C.
4. नामतः B, मानतः A, C.
5. पृष्ठ A, प्रष्ठ ? B,C.
6. मुखोद्गतम् A, मुखोदितम् B, मुखोदतम् C.
7. तन्मुखोद्गतम् A, यथोद्गतम् B, C.
8. एवन्तु A, एकन्तु B, C.
9. मास्यस्वा A, मादाय B, C.
10. त्रिताल A, द्विताल B, C.
11. कपाल A, कपोला B, C.
12. वा A, वे ? B, C.
13. भृद्वर्मं A, भृद्धर्म्मं ? B, C.
14. कारयित्वैवं A, B, कारयेद्वैवं C.

स्ववंशोद्धरणं तस्य जायते मुक्तिरेव च।
वक्रं[1] कलाष्टकायामं प्रथिमा स्याद् द्विगोलकम् ॥८॥
हनू सप्ताङ्गुले चास्य सृक्कनी द्व्यङ्गुले मते।
सप्ताङ्गुलं[2] मुखं प्रोक्तं वक्त्रौ सार्द्धकलौ[3]द्विज ॥९॥*
नासारन्ध्रं भवेन्नेत्रं यवहीनेऽक्षिणी मते।
किञ्चिद्वक्रे[4] स्मृते श्रोत्रे त्रिगोलक[5] समायते ॥१०॥
चतुष्कलं कर्णमध्यं तदर्द्धेन तदुच्छ्रितम्।
वस्वङ्गुला भवेद्ग्रीवा नेत्रैकं चोन्नता तु सा ॥११॥
शेषंनृसिंहवत् कार्य्यं वराहस्यतु[6] विग्रहम्।
शेषाहिविधृतं पादं बाहुना धारयन् धराम् ॥१२॥
शङ्खं वामे तथा लक्ष्मी गदाचक्रे तु दक्षिणे।
एवं न[7]ववराहञ्च कृत्वा यः स्थापयेन्नरः ॥१३॥
भवोदधि समुत्तारं[8] राज्यं वा हतकण्टकम्।
प्राप्नुयान्नात्र सन्देहो ह्यन्यत्रे[9]हैव वा भुवि ॥१४॥
तिर्यङ्नृसिंह देवस्य तथा विपुलमाननम्।
वर्त्तुलेऽस्यतथा नेत्रे स्कन्धौ तालमितौ शुभौ ॥१५॥
भ्रुवे व्याकुञ्चिते वक्त्रं विवृतं चोग्रदंष्ट्रकम्।
लेलिहाना तथा जिह्वा समुद्धतसटं शिरः ॥१६॥
दंष्ट्रे अङ्गुलनिर्याते रक्ताग्रे च सिते तथा।
त्रिकलाभ्यधिकं[10] वक्षः पञ्च नेत्राधिका कटिः ॥१७॥
त्रिकलाभ्यधिके[11] चोरू जानू चापि कलाधिके।
जंघे सार्द्धकले मध्ये विस्तृतेऽग्रे[12] विभागतः ॥१८॥

---

1. वक्त्रं A, चक्रं B, C. 2. सप्ताङ्गुल A, सप्ताङ्गुलं B, C.
3. सार्द्धकलौ A, तत् सार्धकलौ B, C.
4. वक्रे A, वक्त्रे B, C. 5. द्विगोलक A, द्विगोल B, C.
6. तु B, C पुस्तकयोर्नास्ति 7. नववराहञ्च A, देवं वराहन्तु B, C.
8. समुत्तारं A, समायुक्तं B, C. 9. ह्यमुत्र A, ह्यन्यत्रे B, C.
10. भ्यधिकं A, द्यधिकं B, C. 11. भ्यधिका A, द्यधिका B, C.
12. विस्तृताग्रे A, B, विस्तृतेऽग्र C.
* वक्त्रौ सार्द्धकलौ द्विजौ इत्येव युक्तः पाठः।

ऊर्द्धौव् किञ्चित् स्मृतौ पादौ बाहुमूले कलाधिकौ ।
किञ्चित् किञ्चित् तथा हीनौ पर्य्यन्ते चोपबाहुकौ ॥१९॥
वपुरित्थं नृसिंहस्य कुर्य्याद् देशिकसत्तमः ।
जानुदेशे तु संस्थाप्य विदारित[1]महासुरम् ॥२०॥
भूषितं वैजयन्त्या तु [2]मालया श्रीसमन्वितम् ।
[3]खड्गचक्रधरं देवं नृसिंहं कारयेद् बुधः ॥२१॥
स्थापयेत् पापनाशाय जयाय नरकेशरिम्(?) ।
[4]भुजं त्रिगोलकायामं वक्षो विस्तारशोभितम् ॥२२॥
पाणिपादं तुरीयांशं [5]प्रवृद्धशिरसंतथा ।
उर्व्वङ्घ्रिद्वितयाया[6]मविहीनमुख - [7]युग्मकम् ॥२३॥
कटिस्फिक्पार्श्वनाभीषु [8]तदूर्द्धवं वामनं बुधः ।
कृत्वा संस्थापये[9]द्देवं [10]मोहनाशाय सर्व्वथा ॥२४॥
जामदग्न्यान्तु कुर्व्वीत जठा[11]मुकुटमण्डितम् ।
चतुर्व्वाहुं महाभागं सर्व्वक्षत्रान्तकं [12]विभुम् ॥२५॥
दक्षिणे परशुं हस्ते वामे दद्यात्तथा धनुः ।
[13]खड्गं दक्षिणहस्ते तु वामहस्ते तु खेटकम् ॥२३॥
कुठारहस्तं द्विभुजं कुर्याद् वा [14]रेणुकासुतम् ।
कृत्वैवं जामदग्न्यन्तु स्थापयेद् यस्तु मानवः ॥२७॥

---

1. विदारित A, विभावित B, वितारित C.
2. लीलया B, मालया A, C.
3. खड्गचक्रधरं A, B, शङ्खचक्रधरं C.
4. भुज A, भूजं B, C.
5. प्रवृद्ध A, B, प्रवृद्धि C.
6. म A, मं B, C.
8. तदवृद्धं A, तदूर्द्धं B, C.
9. देवं A, दैवं B, C.
10. मोहनार्थाय A, मोहनाशाय B, C.
11. मुकुट A, B, मकुट C.
12. विभुम् A, प्रभुम् B, C.
13. खड्गं A, B, शङ्खं C.
14. रेणुकासुतम् A, रेणुकसुतम् B, C.

सविष्णुं[1] प्राप्नुयाच्छीघ्रं कामांश्च मनसेप्सितान् ।
कुर्य्याद्दाशरथिं रामं सप्ततालं[2] चतुर्भुजम् ॥२८॥
शरकार्मुकहस्तन्तु शङ्खचक्रधरं शुभम् ।
दक्षिणोर्द्धवं भवेच्चक्रं वामोर्द्धवं शङ्खमेव च ॥२९॥
दक्षिणाधो भवेद्वाणो[3] वामाधो धनुरेव[4] च ।
द्विभुजं शरहस्तम्बा रामं कुर्य्यात् सकार्मुकम् ॥३०॥
कृत्वैवं राघवं रामं सर्व्वलक्षणसंयुतम् ।
क्रूरशत्रुविनाशाय स्थापयेत् सर्व्वकामदम् ॥३१॥
तृतीयञ्च तथा[5] रामं चतुर्व्वाहुं शृणुष्व मे ।
वामोर्द्धवं लाङ्गलं[6] दद्यादधः शङ्खं[7] सुशोभनम् ॥३२॥
गदां कृपाणं वा दद्यात् संस्थाने[8] शङ्खचक्रयोः[9] ।
कृत्वैवं वलदेवन्तु यो नरः स्थापयेत् प्रभुम्[10] ॥३३॥
पुत्रं ददाति तस्याथ विपक्षांश्च जयत्यसौ[11] ।
दशतालं तथा बुद्धं[12] पद्मासनगतं हरिम् ॥३४॥
प्रलम्बश्रवणं[13] कुर्य्याच्चीवरालङ्कृतं[14] तथा ।
मलिनाभं समाधिस्थं पद्मास्यं पद्मलोचनम् ॥३५॥
समाधिस्थोन्त्तानपानिं योगदृष्टिसमन्वितम् ।
स्थापयेद् रूपकामस्तु[15] पितेव जगतः स्थितम्[19] ॥३६॥

---

1. वित्तं A, विष्णुं B, C.
2. सप्ततालं A, दशतालं B, C.
3. वाणो A, वाणं B, C.
4. धनुवेर A, धनुमेव B, C.
5. यथा A, तथा B, C.
6. लाङ्गलं A, C, लाङ्गुलं B.
7. शङ्खं A, C, शङ्खञ्च B.
8. संस्थाने इति B, C, पुस्तकयोनास्ति ।
9. शक्ति A, शङ्ख B, C.
10. प्रभुम् A, विभुम् B, C.
11. जयत्यसौ A, B, जयन्त्वसौ C.
12. वृद्धं A, वुद्धं B, C.
13. प्रलम्ब A, प्रणकः B, C.
14. चीरवाणंकृतं A, चीवरालंकृतम् B, C.
15. कामन्तु A, C, कामन्तु B.
16. स्थितम् A, पतिम् B, C.

कल्किनं तु चतुर्बाहुं [1]बद्धतुणं धनुर्द्धरम् ।
शङ्खचक्रधरं कुर्यात् तथा खड्गधरं प्रभुम् ॥३७॥
द्विभुजं [2]महिषारूढ़ं खड्गपाणिं सुरेश्वरम् ।
कल्किनं स्थापयेद् [3]वैनं शक्रस्थानं [4]लभेन्नरः ॥३८॥

इति हयशीर्षे (महा) पञ्चरात्रे द्वादश साहस्रिके
आदिकाण्डे
[त्रयोविंशः]
दशावतार प्रतिमालक्षण पटलः —२३
आदितः श्लोक-संख्या ५८६

---

1. बद्धतूणं A, बद्धतूणधरं B, बद्धतूणधरं C.
2. महिषारुढ़म् A, वा हयारुढं B, C.
3.
4. लभेन्नरः भवेन्नरः B, C,

चतुर्विंशः पटलः

[नवव्यूहप्रतिमालक्षणम्]

भगवानुवाच

अधुना वासुदेवादीन् प्रवक्ष्यामि शृणुष्व मे।
आदिमूर्त्तिर्वासुदेवः पूर्व्वमेवोदितो मया[1] ॥१॥
दक्षिणोर्द्ध्वं गदा यस्य वामोर्द्ध्वं चक्रमुल्वणम्[2]।
ब्राह्मणौ पार्श्वगौ नित्यं शेषमन्यच्च पूर्व्ववत् ॥२॥
द्वितीयो वासुदेवोऽयं द्वापरादौ स उच्यते।
द्विभुजो वाऽथ कर्त्तव्यो वामे शङ्खधरः प्रभुः[3] ॥३॥
वरदो दक्षिणेनाऽथ वासुदेवो द्विधोदितः[4]।
वलदेवश्चतुर्वाहुः कुण्डलैकविभूषितः ॥४॥
लाङ्गली मुषली देवो गदापद्मधरो[5] विभुः।
शङ्खचक्रगदापाणिः कर्त्तव्यो वरदोऽथवा ॥५॥
प्रद्युम्नस्तु चतुर्व्वाहुः शङ्खचक्रधरः शुभः।
चक्रं दक्षिणहस्तेऽस्य वामहस्ते धनुस्तथा ॥६॥
शङ्खञ्च दक्षिणे दद्याद् गदां वामे प्रदापयेत्[6]।
प्रद्युम्नं कारयेद्देवं सर्व्वलक्षणसंयुतम् ॥७॥
स्त्रियौ चैवास्य[7] कर्त्तव्ये खड्गचर्मधरे[8] शुभे।
रतिप्रीत्योर्मध्यगतं कम्बुग्रीवं सकार्म्मुकम् ॥८॥

---

1. तो मया A, तः पुरा B, C.
2. मुल्वनम् A, मेवच B, C.
3. प्रभु A, शुभः B, C.
4. द्विधोदितः A, द्विधा मतः B, C.
5. पद्मधरो A, चक्रधरो B, C.
6. प्रदापयेत् A, B, दापयेत् C.
7. वै A, वै B, C.
8. खड्गचर्म्म A, शङ्खचक्र B, C.

द्विभुजं शरहस्तम्वा प्रद्युम्नं कारयेद्बुधः ।
अनिरुद्धः कम्बुग्रीवश्चतुर्बाहुः सुभूषितः[1] ॥९॥
दक्षिणेऽस्य गदा देया चक्रशङ्खौ तु[2] वामतः ।
दक्षिणे च तथा पद्ममनिरुद्धस्य[3] दापयेत ॥१०॥
नारायणश्चतुर्बाहुः[4] कार्य्यन्तुलक्षणं मया ।
मूर्त्तिद्वादशके पूर्व्वं कीर्त्तितं ब्राह्मणः[5] शृणु ॥११॥
*चतुर्मुखश्चतुर्बाहु बृहज्जठरमण्डलः ।
ऊर्द्धवं बद्धजटाजूटो[6] लम्बकूर्च्चः समेखलः[7] ॥१२॥
शोभनं दक्षिणे हस्ते दद्यात् साक्षतसूत्रकम्[8] ।
स्रुवञ्च दक्षिणे दद्यात् वामहस्ते तु कुण्डिकाम् ॥१३॥
आज्यस्थाली कुशोपेतां वामहस्ते नियोजयेत् ।
शङ्खचक्रगदापाणिः कार्यो वाऽथ चतुर्म्मुखः ॥१४॥
सरस्वती च सावित्री वामदक्षिणसंस्थिते ।
कर्त्तव्या मुनयो वाऽथ परिवार्य्यव्यवस्थिताः ॥१५॥
विनिविष्ट[9] (:) सदा ब्रह्मा कार्य्यो[10] नेष्टस्तथान्यथा[11] ।
नृसिंहवत् स्वमात्रातु किञ्चिदभ्यधिकः स तु ॥१६॥
विष्णुरष्टभुजः[12] कार्यश्चतुर्बाहुरथापि वा ।
खड्गं गदां शरं दद्याद्दक्षिणे वरदोऽपरः ॥१७॥

---

1. सुभूषितः A, सुशोभितः B, C. 2. तु A, ते B, C.
3. पद्मम A, C, पद्मोऽस्य B.
4. नारायणश्चतुर्बाहुः A, नारायणं चतुर्बाहु B, C.
5. ब्राह्मणः A, ब्राह्मणः B, C. 6. ऊर्द्धं वद्ध A, ऊर्द्धमूर्द्ध B, C.
* श्लोकांशोऽयं C पुस्तके नास्तिः ।
7. लम्बकूर्च्चः सुमेखलः A, C. सुकूर्च्चः ससुमेखलः B.
8. साक्षत सूत्रकम् A, च दक्षसूत्रकम् B, C.
9. विनिविष्ट A, विनिविष्ट [मः] B, C.
10. कार्य्या A, कार्य्यो B, C. 11. स्तथो A, स्तथा B, C.
11. इतः परं B, C, पुस्तकयोः "वैनतेयगतः सौम्यः सन्दष्टोष्ठपुटोऽपि वा" इत्येधिकं वर्त्तते ।

कार्मुकं खेटकं चक्रं शङ्खं वामेऽस्य दापयेत् ।
चतुर्भुजेगदा देया दक्षिणे वरदोऽपरः ॥१८॥
वामे शङ्खश्च चक्रञ्च विष्णुरेवं द्विधा मतः ।
नरसिंहश्चतुर्वाहुः शङ्खचक्रगदाधरः ॥१९॥
शङ्खचक्रधरो वापि विदारितमहासुरः ।
चतुर्व्वाहुर्वराहस्तु शेषपाणि पदे धृतः ।२०॥
धारयन् वाहुना[1] पृथ्वीं वामेन[2] कमलामथ ।
पादलग्ना धरा कार्य्या यदा लक्ष्मी भुजस्थिता ।।२१॥
वराहं कारयेद्देवं[3] शङ्खचक्रगदाधरम् ।
सप्ततालौ प्रशस्येते वराहनरकेशरी ।
नवतालावभ्यधिकौ[4] पुरस्तात् कथितौ तव ॥२२॥

इति हयशीर्षे (महा) पञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे
(चतुर्विंशः)
नवव्यूहप्रतिमालक्षण पटलः ॥२४॥
आदितः श्लोक संख्या—६०६

———

1. धारयन् वाहुना A, धारयेद् वाहनं B, C.
2. वामेन A, वामणं B, C.
3. द्देवं A, C, देवं B.
4, वेभ्यधिकौ A, वत्यधिकौ B, C.

पञ्चविंशः पटलः

पुनः प्रतिमालक्षणम्

भगवानुवाच

अतःपरं प्रवक्ष्यामि प्रतिमालक्षणं पुनः।
अष्टबाहुं बुधः कुर्य्याद् देवं त्रैलोक्यमोहनम् ॥१॥
गरुड़ासनगं देवं प्रथमे[1] वयसि स्थितम्।
चक्रं खड्गञ्च[2] मुसलं साङ्कुशं दक्षिणेन्यसेत् ॥२॥
शङ्खं[3] शार्ङ्गं गदापाशं[4] वामहस्तेषु विन्यसेत्।
लक्ष्मी सरस्वती कार्य्ये पद्मवीणा समन्विते ॥३॥
पुरुषोत्तमभेदांस्तु[3] वर्णयिष्यामि सत्तम।
सङ्कर्षेऽवसरप्राप्तान्[4] स्थापने तु[5] यथाविधि ॥४॥
विंशबाहुं[6] विश्वरूपं कुर्य्यात्तल्लक्षणं श्रृणु।
चक्रं खड्गञ्च[7] मुषलमङ्कुशं पट्टिशन्तथा ॥५॥
मुद्गरञ्च तथा पाशं[8] शक्ति शूलं शरन्तथा।
दक्षिणेषु प्रदद्याद् वै[9] वामेषु श्रृणु साम्प्रतम् ॥६॥
शङ्खं शार्ङ्गं तथा[10] पाशं तोमरं लाङ्गलन्तथा।
*परशुं छुरिकां दण्डं चर्मप्रक्षेपणन्तथा ॥७॥

---

1. प्रथमं A, B, प्रथमे C. 2. चक्रं खड़गञ्च A, शङ्खं चक्रञ्च B, C.
3. शङ्खशार्ङ्गं A, शङ्खं शार्ङ्गं B, शङ्खं शार्ङ्गं C.
4. गदापाशं A, B, गदां पाशं C. 5. भेदांस्तु A, भेदांस्ते B, भेदास्ते ? C.
6. वसरः A, वसरः B, C. 7. यथाविधि A, तथाविधि B, C.
8. बिशवाहुं A, बिंशद्‌बाहुं B, C. 9. खड़गञ्च A, शङ्खञ्च B, C.
10. पाशं A, शङ्खं B, C. 11. वै A, B, नास्ति C अस्ति
12. शार्ङ्गं तथा A, शार्ङ्गं गदा B, C.
* इतः परं B, C पुस्तकयोः :"नृसिंहोन्तं परं मानं विश्वरूपस्य कीर्त्तितम्" इति अधिकं वर्त्तते।

चतुर्मुखं दक्षिणेऽस्य त्रिनेत्रस्वामतो न्यसेत् ।
स्तुवन्तो मुनयः कार्य्या विद्रवन्तो निशाचराः ॥८॥
वामपार्श्वेन शयितं कारयेज्जलशायिनम् ।
शेषपर्य्यङ्कगं[1] देवं चतुर्बाहुं जनार्दनम् ॥९॥
श्रिया[2] धृतैकचरणं सर्व्वालङ्कारभूषितम् ।
देवीभिर्विमलाद्याभिः सेव्यमानमितस्ततः ॥१०॥
नाभ्युत्थ[3]पङ्कजारुढ़ं पितामहसमन्वितम् ।
रुद्रार्द्धे देहस्था कुर्य्याच्चतुर्बाहुं जनार्दनम् । ॥११॥
ईशानं दक्षिणे पार्श्वे देवं शूलविधारणम्[4] ।
गदाचक्रधरं चैव[5] मुकुटेन विभूषितम् ॥१२॥
जटाचन्द्रधरं[6] रौद्रं[7] वैष्णवं रत्नमण्डितम् ।
कुण्डलोद्योतित[8]ञ्चैकमपरं नागकुण्डलम् ॥१३॥
व्याघ्रचर्म्मपरीधानमपरं वस्त्रभूषितम्[9] ।
ब्रह्मसूत्रधर[10]ञ्चैक मन्यन्नागोपवीतिनम् ॥१४॥
गौरी चैकेन पार्श्वेन लक्ष्मी चैकेन संस्थिता ।
एवं लक्षणसंयुक्तं कारयेद्धरिशङ्करम् ॥१५॥
ममैव[11] लक्षणं वक्ष्ये तन्निवोध सुरोत्तम ।
वराहवन्मुखं कार्य्यमायामाद्द्विंशदङ्गुलम् ॥१६॥

---

1. शेष A, C, शेषं B.
2. ....2. "श्रिया" इत्येतावदारभ्य "जनार्दन" मित्यन्तं B पुस्तके नोपलभ्यते A, C पुस्तकयो वर्त्तते ।
3. अमुष्य A, अमुष्य B, पुस्तके नास्ति, नाभ्युत्थं C.
4. शूलविधारणम् A, शूलं विधारिणम् B, C.
5. चास्य A, चैव B, C.
6. चक्रधरं A, चक्रधरं B, C.
7. देवं A, रौद्रं B, C.
8. कुण्डलोद्योतित A, कुण्डलद्योतित B, C.
9. ध्वस्त B.
10. वरच्चैवं मालां B.
11. मयैव A, मायैव B, ममेव C.

वक्त्रदेशो हनू कार्य्ये[1] आयते[2] तु चतुष्कले[3] ।
सार्द्धकलन्तु सृक्किण्ये ततश्चाष्टाङ्गुलं मुखम् ॥१७॥

द्व्यङ्गुलं घ्राणरन्ध्रन्तु कुटिलं त्र्यङ्गुलायतम्[4] ।
आयामाद् द्व्यङ्गुले कार्य्ये द्व्यङ्गुले चाधिकेऽक्षिणी ॥१८॥

पञ्चाङ्गुलौ स्मृतौ कर्णौ त्र्यङ्गुलं[5] विस्तृतौ तु तौ[6] ।
कर्णान्तरं[7] चतुर्नेत्रं कलैकश्चोन्नतश्च तत् ॥१९॥

तालैकविस्तरा[8] ग्रीवा यवाङ्गुलसमा[9] मता ।
घण्टाविभूषिता ग्रीवा शिरश्चालकभूषितम् ॥२०॥

शेषश्चतुर्भुजं देहं नृसिंहस्येह[10] कीर्त्तितम् ।
वामहस्तेऽस्य कुर्व्वीत वेदाश्चत्वार[:?][11] सुव्रत ॥२१॥

त्वञ्चाप्यग्रे[12] स्थितः कार्य्यो वेदग्रहपुरः सरः ।
अपरे वामहस्ते तु शङ्खं दद्यात् सुशोभनम् ॥२२॥

दक्षिणे द्वितये कुर्य्याद्[13] गदां चक्रं विचक्षणः ।
शेषनागधृतं पादं वामं कार्य्यं ममानघ ॥२३॥

दक्षिणं कूर्मपृष्ठस्थं पादं कुर्य्यात् सदैव मे[14] ।
शङ्खचक्रगदा वेदपाणिस्त्वा कारयीत माम् ॥२४॥

---

1. हनू कार्य्ये A, B, हनुः कार्य्यं C. 2. आयते च A, आयाते तु B, C.
3. सुपुष्कलम् A, चतुष्कले B, C. 4. त्र्यङ्गुलायतम् A, द्व्यङ्गुलायतम् B, C.
5. त्र्यङ्गुलं A, द्व्यङ्गुलं B, C. 6. विस्तृतौ तु A, विस्तृतन्तु B, C.
7. वर्णान्तरं A, कर्णान्तरं B, C. 8. तालैकं A, विस्तृता B, C.
9. यवाङ्गुल समामता A, पञ्चाङ्गुल समायता B, C.
10. स्येह A, स्यैव B, स्येव C. 11. श्चत्वारः A, चत्वारः B, C.
12. त्वञ्चाप्यग्रे A, पञ्चाप्यग्रे B, C, 13. कुर्य्यात् A, दद्यात् B, C.
14. सदैवतम् A, सदेव मे B, C.

अश्ववक्त्रश्चतुर्बाहु मेवमेव[1] व्यवस्थितम्।
पुष्करासनमध्यस्थं देवीद्वितयसंयुतम्[2]।
एवं ममार्चा कर्त्तव्या सर्व्वज्ञत्वमभीप्सुभिः ॥२५॥

इति हयशीर्षे (महा) पञ्चरात्रे द्वादश साहस्त्रिके
आदिकाण्डे
(पञ्चविंशः)
प्रतिमालक्षण पटलः ॥२५॥

आदितः श्लोक-संख्या—६३४

---

1. मेव A, मेवं B, C.
2. देवी द्वितय संयुतम् A, देवं द्वितय संस्थितम् B, C.

षड्विंशः पटलः

ग्रहप्रतिमालक्षणम्

भगवानुवाच

अतःपरं प्रवक्ष्यामि ग्रहाणां लक्षणं तव।
आदित्यो द्विभुजः प्रोक्तो युवा लक्षणलक्षितः ॥१॥
कम्बुग्रीवः पीनवक्षा अलकालङ्कृतः शुभः।
सर्वाभरणसंयुक्तो दीप्तः सौम्यो द्विलोचनः ॥२॥
पद्मस्थः खेटिकागुप्तः[1] पादो वा रथसंस्थितः।
एकचक्रो रथस्तस्य सप्ताश्वोऽरुणसारथिः ॥३॥
हस्तयोः पङ्कजौ कार्य्यौ तस्य स्कन्धमितौ शुभौ।
दण्डपिङ्गलकौ कार्य्यौ प्रतीहारौ[2] विभूषितौ ॥४॥
खड्गखेटकहस्तस्तु[3] रथस्थो दण्डनायकः।
मसीभाजनहस्तस्तु[3] पिङ्गलो लेखनीकरः ॥५।
संज्ञा[4] च निष्कुता चैव कार्य्ये पार्श्वद्वये[5] स्थिते।
शरकार्मुकहस्ते ते वामदक्षिणसंस्थिते[6] ॥६॥
आदित्यं कारयेद् देवं सर्व्वरोगविनाशनम्।
+चित्रे तु लेखयेद् भानुं कंचुका[7]गुप्तविग्रहम् ॥७॥
भेदानस्यापरस्या[8]र्थे कथयिष्यामि तेऽखिलान्[9]।
सोमः सौम्याननः कार्य्यो द्विभुजालङ्कृतः[10]शुभः ॥८॥

---

1. खेटिकागुप्तः A, खेटकाहस्तः B, खेटकागुप्तः C.
2. प्रतीहारौ A, प्रतिहारौ B, C. 3. न्तु A, स्तु B, C.
4. राज्ञी A, संज्ञा B, C. 5. पार्श्वेद्वये A, पार्श्वद्वये B, C.
6. ....6. पादद्वयमिदं A पुस्तके नोपलभ्यते B, C पुस्तकयोरुपलभ्यते च।
7. कञ्चुका A, कञ्चुकां ? B, C. 8. स्यापरान् दौर्य्ये A, परस्यार्थे B, C.
9. ह्यखिकान् A, खिलानां B, C. 10. द्विभुजालंकृतः A, C, द्विभुजोऽलंकृतः B

निविड़ाङ्गोऽङ्गारकस्तु[1] सर्व्वलक्षणसंयुतः।
कामरूपो बुधः कार्य्यो गुरुः सौम्यो वक्रसंस्थितः[2] ॥९॥
कालस्तु[3] भार्गवः प्रोक्तः खञ्जस्तु सौरि[4]रुच्यते।
करालास्यः[5] स्मृतो राहुश्छिन्नदेहः कृताञ्जलिः ॥१०॥
भुजगार्द्धतनुः केतू रूपेणातीव धूसरः[6]।
सव्योरुस्थितदोर्दण्डा[7] दक्षिणेनाभयप्रदाः।
द्विभुजालङ्कृताः सर्व्वे ग्रहाः कामफलप्रदाः[8] ॥११॥

इति हयशीर्षे (महा) पञ्चरात्रे द्वादश साहस्रिके
आदिकाण्डे
(षड्विंशः)
ग्रहप्रतिमालक्षण पटलः

आदितः श्लोक-संख्या—६४५

———

1. निविड़ाङ्गो A, बिड़ालाङ्गा B, C. 2. वसं A, वक्रसं B, C.
3. कालस्तु A, वाणस्तु B, C. 4. शिवि A, सौरि B, C.
5. करालस्यः A, करालास्यः B, C, 6. धूरसः ? B.
7. साव्यवस्थितादोर्दण्डा दक्षिणोभयप्रदाः B.
8. कुल B.

सप्तविंशः पटलः

[मातॄणां लक्षणम्]

भगवानुवाच

ग्रहाणां लक्षणं प्रोक्तं मातॄणां शृणु साम्प्रतम् ।
वीरभद्रो वृषारूढो वीणाहस्तस्त्रिलोचनः ॥१॥
मातॄणामग्रतः कार्य्यो जटाखण्डेन्दुमण्डितः ।
द्विभुजा च[1] चतुर्वक्त्रा वेधसो वेशधारिणी[2] ॥२॥
हंसारूढ़ा च[3] पद्मस्था[4] सर्व्वाभरणभूषिता[5] ।
तस्या दक्षिणहस्ते तु प्रदातव्या गुणास्तदा[6] ॥३॥
[7]कमण्डलुर्वामहस्ते योगपट्टेन वेष्टिता ।
चतुर्भुजातु रुद्राणी वृषारूढ़ा त्रिलोचना ॥४॥
शूलं शरं दक्षिणे तु वामे वज्रञ्च[8] कार्मुकम् ।
स्कन्दरूपा च कौमारी बालाकारा सुमांसला ॥५॥
मयूरवरमारूढ़ा द्विभुजा शक्तिधारिणी[10] ।
चतुर्भुजा वैष्णवी स्याच्छङ्खचक्रगदायुधा ॥६॥
पक्षिराजसमारूढ़ा सर्व्वाभरणभूषिता[14] ।
[13]वराहास्या तु वाराही बृहत्कण्ठा महोदरा ॥७॥

---

1. च A, तु B, C. 2. वेध A, वेश B, C.
3. च A, थ B. C. 4. पद्मस्था A, पद्मस्थ B, C.
5. भूषिता A, संयुक्ता B, C. 6. स्तदा A, स्तथा B, C.
7. कमण्डलुं A, कमण्डलु B, C. 8. वामे वज्रञ्च A, वामाचक्रञ्च B, C.
9. वर A, पर B, C. 10. शान्ति A, शक्ति B, C.
11. भूषिता A, संयुक्ता B, C.
12. वराहस्य त बाराहं बृहत्कण्ठा महोदया इति B, C पुस्तकयोः पाठः प्रामादिकः ।

महिषस्था दण्डहस्ता शङ्खचक्रगदायुधा[1]।
सप्ततालां तु[2] वाराही कर्त्तव्या शुभलक्षणा ॥८॥
माहेन्द्री च[3] गजारूढ़ा द्विभुजा वज्रधारिणी।
नवयौवनसंयुक्ता[4] भूषिता[5] बहुलोचना ॥९॥
चतुर्भुजा तु चामुण्डा कोटराक्षी त्रिलोचना।
निर्मांसा अस्थिसारा च[6] ऊद्‍र्ध्वकेशी कृशोदरी[7] ॥१०॥
नागयज्ञोपवीताङ्गी द्वीपिचर्म्मोत्तरच्छदा।
मुण्डमालाधरा देवी अस्थिखण्डैर्विभूषिता[8] ॥११॥
कपालं पट्टिशं वामे शूलं कर्त्री[9] च दक्षिणे।
शवारूढ़ा सुदुष्प्रेक्षा चामुण्डेयं प्रकीर्त्तिता ॥१२॥
विनायको नराकारो वृहत्कुक्षिर्गजाननः[10]।
त्रिनेत्रोऽथ वृहच्छुण्डो नागयज्ञोपवीतवान् ॥१३॥
मुखं[11] सप्तकलं तस्य विस्तारेण सुरोत्तम।
दैर्घ्येणाष्टकलं वक्त्रं शुण्डं[12] षट्त्रिंशदङ्गुलम् ॥१४॥
कलाद्वादशनाहातु[13] ग्रीवा सार्द्धकलोच्छ्रिता।
पीनवक्षा गणेशस्तु उन्नतोरुः[14] प्रशस्यते ॥१५॥
षट्त्रिंशदङ्गुलायामं कण्ठगुह्यान्तरं भवेत्।
समं सुशोभनं तद्वद् द्व्यङ्गुला नाभिरिष्यते ॥१६॥

---

1. गदायुधा A, गदाधरा B, C.
2. व्यवहित इति B पुस्तक पाठः प्रामादिकः, वाराही A, C.
3. च A, तु B, C.
4. संयुक्ता A, संसक्ता B, C.
5. भूषिता A, भूषणा B, C.
6. च A, B, तु C.
7. ऊर्द्धकेशी कृशोदरी A, ऊर्द्धकेशा दिगम्बरी B, ऊर्द्धकेशा कृशोदरी C.
8. अस्थिखण्डैर्विभूषिता A, C. अस्थिखण्ड विभूषिता B.
9. शूलंकर्त्री A, शूलकर्णें B, शूलकर्त्री C.
10. रजाननः A, गंजाननः B, C.
11. मुखं A, अथ B, C.
12. शुण्डं B, शुण्डं A, C.
13. नाम्र B, नाहा A, C.
14. उन्नतोरुः A, तुन्दाभोगः B, C.

उरू जङ्घे तथा पादे कर्त्तव्ये द्वादशाङ्गुले[1]।
द्व्यङ्गुलं चोच्छ्रितौ पादौ द्वादशाङ्गुलमायतौ[2] ॥१७॥
सुदन्तं दक्षिणे हस्ते परशुञ्च निवेशयेत्।
लड्डुकैः पूर्णपात्रन्तु उत्पलं वामतो न्यसेत् ॥१८॥
सुमुखश्च विडालाक्षी पार्श्वद्वयव्यवस्थितौ।
गणेशलक्षणं प्रोक्तं स्कन्दस्य प्रोच्यते[3]ऽधुना ॥१९॥
मयूरवरमारूढो द्विभुजो वालरूपधृक्[4]।
कुक्कुटस्वामहस्ते तु शक्तिं दक्षिणतो न्यसेत् ॥२०॥
द्विभुजस्तु समाख्यात एकवक्त्रोऽग्निजस्त्वयम्।
षण्मुखः षड्भुजो वापि भुजैर्द्वादशभिस्तथा।
स्थापितः[5] कार्त्तिकेयो वै दर्शनात् पापनाशनः ॥२१॥

इति हयशीर्षे (महा) पञ्चरात्रे द्वादश साहस्रिके आदिकाण्डे

(सप्तविंशः)

मातृणांलक्षण पटलः ॥१५॥

आदितः श्लोक-संख्या—६६६

---

1. कर्त्तव्ये द्वादशाङ्गुले A. कर्त्तव्या द्वादशाङ्गुलैः B. C.
2. मायतौ A, यामतौ B, C.
3. चोच्यते B, प्रोच्यते C.
4. बाम B, वाल A, C.
5. स्थापितः A, स्थाप्यते B, C.

अष्टाविंशः पटलः

[लोकेशप्रतिमालक्षणम्]

भगवानुवाच

अतःपरं प्रवक्ष्यामि लोकेशानान्तु लक्षणम्।
ऐरावतगजारूढ़ो वज्रहस्तः सुराधिपः ॥१॥
द्विभुजो बहुनेत्रश्च सर्व्वाभरणभूषितः।
सर्व्वलक्षणसम्पूर्णः कार्य्यस्त्विन्द्रो नृपोपमः ॥२॥
ज्वालामण्डलमध्यस्थः कुर्चालः श्मश्रुलस्तथा।
[1]योगपट्टासनोपेतो ब्रह्मसूत्रविभूषितः ॥३॥
अधिस्थोऽथ द्विबाहुर्वै कार्यो[2] वह्निर्विलोहितः।
दक्षिणे चाक्षसूत्रन्तु कुण्डिका[3]म्वामतो न्यसेत् ॥४॥
पाश[4]दण्डायुधोपेतो[5] द्विभुजो महिषासनः।
वैवस्वतः पीनकायो दिव्याभरणभूषितः ॥५॥
विरूपैः किङ्करैर्युक्तो लक्षणैर्विविधैर्युतः।
पार्श्वद्वयेऽस्य पुरुषौ कर्त्तव्यौ[6] भीषणाकृती ॥६॥
द्विबाहुः पीनदेहस्तु[7] खड्गहस्तोऽञ्जनप्रभः।
विभूषितः सदा कार्य्य ऋक्षगोरक्षसां पतिः[8] ॥७॥
द्विबाहुः पाशहस्तस्तु मकरस्थो विभूषितः।
कर्त्तव्यो वरुणो देवः कुण्डलाभ्यां विभूषितः ॥८॥

---

1. योगपट्टासनोपेतो A, योगपट्टसमोपेतो B, C.
2. कार्य्यौ A, कार्य्या B, C.
3. कुण्डिका A, दण्डिका B, C.
4. पाद A, पाश B, C.
5. दण्डायुधोपेतो A, दण्डधरोपेतो B, C.
6. कर्त्तव्यौ A, कर्त्तव्ये B, C.
7. पीनबाहुश्च A, B, पीनदेहस्तु C.
8. ऋक्ष A, वक्ष्ये B, C.
9. पतिः A, प्रति B, C.

द्विबाहुर्वज्रहस्तस्तु मृगारूढः स्वलङ्कृतः[1] ।
सर्व्वाभरणसंयुक्तः कार्य्योऽवद्यः[2] सुरोत्तमः ॥९॥
सुपीनदेहो[3] यक्षेशो हारकेयूरभूषितः ।
सर्व्वलक्षणसम्पूर्णो गदाशङ्ख[4]धरोऽनघः ॥१०॥
नानारत्नोज्ज्वलेनाथ मुकुटेन विभूषितः ।
कर्त्तव्यो वामनाकारो द्विभुजो नरवाहनः ॥११॥
वृषारूढश्चतुर्बाहुः शङ्खकुन्देन्दुसप्रभः[5] ।
कपालं वामहस्तेऽस्य[6] शूलं हस्तेऽस्य दक्षिणे ॥१२॥
नागपाशं तथा वामे दक्षिणेन वरप्रदः ।
ईशानं कारयेद्देवं सर्व्वविद्येश्वरं प्रभुम् ॥१३॥
अथवा सर्व्वलोकेशान् स्थितान् कुर्य्याद् विचक्षणः ।
यथोक्तलक्षणोपेतान् पद्मपीठस्थितान् बुधः ॥१४॥

इति हयशीर्षे (महा) पञ्चरात्रे द्वादश साहस्रिके आदिकाण्डे
(अष्टाविंशः)
लोकेशप्रतिमालक्षण पटलः ॥२५॥

आदितः श्लोक-संख्या ६८०

---

1. स्वलङ्कृतः A, सलक्षणं B, C.
2. वायुः A, ऽवद्यः B, C.
3. हयक्षेशो A, हयक्षेशा B, C.
4. गदाशङ्ख A, शङ्खचक्र B, C.
5. सप्रभः A, सुप्रभः B, C.
6. हस्य A, तु B, C.

उनत्रिंशः पटलः

रुद्रप्रतिमालक्षणम्

भगवानुवाच

अतःपरं प्रवक्ष्यामि रुद्रमूर्त्तेस्तु लक्षणम्।
पद्मासनश्चतुर्वाहुर्नागयज्ञोपवीतवान् ॥१॥
व्याघ्रचर्म्मपरीधानो जटाखण्डेन्दुभूषितः[1]।
कपालं कुण्डिका वामे त्रिशूलं दक्षिणे तथा ॥२॥
गलन्तिकान्तथा दद्याद्दक्षिणे सुरसत्तम।
कुष्माण्डश्च[2] तथा भृङ्गी वामदक्षिणसंस्थितौ ॥३॥
एवन्तु कारयेद् रुद्रं सर्व्वलक्षणलक्षितम्।
त्रिशूलधृक् तथा वामे वरदो[3] दक्षिणेन तु ॥४॥
द्विभुजोऽयं हरः साक्षात् सर्व्वकामफलप्रदः[4]।
अर्द्धनारीश्वरस्येह संक्षेपाल्लक्षणं शृणु ॥५॥
हरार्द्धं दक्षिणं[5] प्रोक्तमुमार्द्धं वाममुच्यते।
शङ्करार्द्धं जटाबद्धमर्द्ध[6]चन्द्रविभूषितम् ॥६॥
गौर्य्यर्द्धं बालकं कार्यं[7] मौलिना भूषितं[8] शिरः।
शिवार्द्धे कुण्डलं कर्णे[9] उमार्द्धे बालिका भवेत् ॥७॥
गौर्य्या भुजद्वयं[10] कार्य्यं केयूरं कङ्कणं तथा।
कुण्डिकां कमलञ्चैव दद्याद् देव्या भुजद्वये ॥८॥

---

1. जटाखण्डेन्दु A, जटामुण्डेन्दु B, C.
2. कुष्माण्डश्च A, कुष्माण्डश्च B, C.
3. वरदे B, वरदो A, C.
4. प्रदम् A, प्रदः B, C.
5. दक्षिणं A; दक्षिणे B, C.
6. B, C पुस्तकयोः सर्द्ध इत्यंशो नास्ति
7. कार्यं A, कार्यां B, C.
8. भुषितं A, विभूषितं B, C.
9. कुण्डलंकर्णे A, कुण्डलकर्णे B, C.
10. भुजद्वयं A, भुजद्वये B, C.

[1]अक्षसूत्रं त्रिशूलञ्च तदूर्द्ध्वं हारमेव च।
उपवीतं हरार्द्धे च[2] ऊद्‌र्ध्वलिङ्गं व्यवस्थितम् ॥९॥
व्याघ्रचर्म्म तथा कट्यां सर्पमेखलसंयुतम्।
दिव्यवस्त्रसमोपेतं गौर्य्यर्द्धं[3] मेखलायुतम् ॥१०॥
शिवस्य दक्षिणः पादः पद्मोपरि व्यवस्थितः।
किञ्चिदभ्युन्नतो वामे नायिका भूषिताङ्गुलिः ॥११॥
सालक्तकश्च कर्त्तव्यो[4] नुपूरेण विभूषितः[5]।
अर्द्धनारीश्वरः प्रोक्त उमेशं शृणु सत्तम ॥१२॥
सर्व्वलक्षण सम्पूर्णो[6] द्विभुजोऽथ त्रिलोचनः।
व्याघ्रचर्म्मपरीधानो जटाखण्डेन्दुभूषितः ॥१३॥
चित्राम्बरधरा गौरी[7] द्विभुजालङ्कृता शुभा।
अर्द्धचन्द्रासनेनाथ उपविष्टो हरः स्मृतः ॥१४॥
सव्योरुसंस्थिता गौरी शङ्करेणावगूहिता[8]।
हरस्य दक्षिणे हस्ते दद्यादिन्दीवरं शुभम् ॥१५॥
मध्यस्कन्धे शिवस्यैव[9] हस्तं गौर्य्यास्तु दक्षिणम्।
आदर्शश्च तथा वामे ह्युमेशो कीर्त्तितौ मया ॥१६॥
अष्टादशभुजं कुर्य्यात् भैरवं दैत्यमर्द्दनम्।
नानाभरणसंयुक्तं नानायुधधरं विभुम् ॥१७॥
मुण्डमालाधरं देवं व्यादितास्यं सुशोभनम्[10]।
लेलिहानं महा[11]जिह्वं तीक्ष्णदंष्ट्रोग्रलोचनम्[12] ॥१८॥

---

1. स्तनपीनोन्नतं वामे तदर्द्धं A, अक्षसूत्रं त्रिशूलञ्च तदूर्द्धं B, C.
2. च A, तु B, C. 3, गौर्य्यर्द्धं A, गौर्य्याङ्गं B, C.
4. कर्त्तव्ये A, कर्त्तव्यो B, C. 5. विभूषिता A, विभूषितः B, C.
6, सम्पूर्णो A, संयुक्तो B, C. 7. गौरी A, देवी B, C.
8. शङ्खावलागृहीताः A, शङ्करेणावगूहिता B, C.
9. शिवस्येह A, शिवस्यै B, C.
10. व्यादितास्यसुशोभनम् B, व्यादितास्यं सुशोभन् A, C.
11. महा इति पदांशो A पुस्तके नास्ति।
13. तीक्ष्णदीप्तोग्रलोचनम् A, तीक्ष्णदंष्ट्रोग्रलोचनम् B, C.

[1] प्रमथैर्यातुधानैश्च मातृभिः परिवारितम् ।
श्मशानारण्यदेशेतु स्थापयेद्द भैरवं हरम् ॥१६॥
लक्षणं तस्य वक्ष्यामि तन्निबोध सुरोत्तम ।
मुखमष्टकलं[2] कार्य्यं विवृतास्यं सुभीषणम्[3] ॥२०॥
प्रसृतं नयनं[4] कार्य्यं शिरोमुण्डेन्दुभूषितम् ।
कथितं भैरवेशस्य वक्षोदेशो[5]ऽधिको गतः[6] ॥२१॥
नेत्रत्रयाधिकं वक्षः कटिः पञ्चकलाधिका ।
त्रिनेत्राद्यधिका[7] चोरू जानुपाणिः कलाधिका ॥२२॥
जङ्घे सार्द्धकलं वृद्धे[8] तद्विभागेन वाग्रतः[9] ।
किञ्चिद्वद्धौ[10]तथा पादौ बाहुमूले कलाधिकौ ॥२३॥
उपबाहोस्तु पर्य्यन्तं यावद्धीनतरं[11] क्रमात् ।
सुभीषणे तथा वक्त्रे दंष्ट्रेऽङ्गुलविनिर्गते ॥२४॥
त्रिशूलाग्रेण संविध्य प्रक्षिप्तसुमहासुरः ।
धनुः कृपाणखट्वाङ्ग शक्ति कङ्कालपाशधृक् ॥२५॥
शरं खेटकहस्ते तु कर्त्तृकामुद्गरायुधः ।
वराभयप्रदश्चापि गदापरशुधृक् तथा ॥२६॥
कपालमुण्डधारी च नागयज्ञोपवीतवान् ।
व्याघ्रचर्म्मपरीधानः शस्यते भैरवेश्वरः ॥२७॥
एकवक्त्रोऽयमाख्यातः पञ्चवक्त्रोऽथवा भवेत् ।
कर्त्तव्यो भैरवस्त्वेवं सर्व्वकामफलप्रदः ॥२८॥

इति हयशीर्षे महापञ्चरात्रे द्वादश साहस्रिके
आदिकाण्डे
ऊनत्रिंशः
रुद्ररूपप्रतिमालक्षण[12] पटलः

आदितः श्लोक-संख्या—७०८

---

1. इति श्लोकैकभागः B पुस्तके नास्ति । 2. मष्टकलं A, मष्टाङ्गुलं B, C.
3. सुभीषणम् A, सुशोभनम् B, C. 4. प्रसृतं नयनं A, प्रभूत नयनं B, C.
5. देशा B, देशो A, C. 6, द्वि B.
7A. गतः A, B, मयो C. 8. वृक्षे A; वृद्धे B, C.
9A. व्याग्रतः A, B, वा युत C. 10. वद्धौ A, वृद्धौ B, C.
11. यावद्धीनतरं A, यावद् ज्ञानतरं B, C. 12. रुप इति A, C पुस्तकयो नास्ति ।

त्रिंशः पटलः

गौरीप्रतिमालक्षणम्

भगवानुवाच

अतःपरं प्रवक्ष्यामि गौर्या लक्षणमुत्तमम्।
द्विभुजा चाम्बिका त्र्यक्षा सिंहारूढ़ा सुभूषिता ॥१॥
त्रिशूलं दक्षिणे हस्ते वामहस्ते तु दर्पणम्।
चतुर्भुजा वा पद्मस्था त्रिशूलवरधारिणी ॥२॥
गलन्ती[1] कुण्डिकाहस्ता दक्षिणं वरदं करम्।
एवं[2] द्विधा ते कथिता[3] अम्बिकेयं सुरेश्वरी ॥३॥
ललितापि च कर्त्तव्या गणेशगुहसंस्थिता।
चतुर्भुजा च पद्मस्था शोभनादर्श[4]धारिणी ॥४॥
भुजस्तस्याश्च[5] कर्त्तव्यो वामःस्कन्ध[6]शिरोगतः।
श्रीफलं दक्षिणे देयं नानाभरणभूषिता[7] ॥५॥
चण्डिकालक्षणं वक्ष्ये तन्मे निगदतः शृणु।
कार्य्या दशभुजा देवी चण्डिकाष्टभुजाथवा ॥६॥
शूलं खड्गं तथा चक्रं शक्तिं चेषुञ्च[8] दक्षिणे।
नागपाशं तथा चर्म्म परशुं चाङ्कुशन्तथा ॥७॥
वामहस्तेषु दातव्यं धनुश्चाकर्ण[9]पूरितम्।
सिंहारूढ़ा तथा देवी सर्वलोकेश्वरेश्वरी[10] ॥८॥

---

1. गलन्ती A, शलन्ती B, C.
2. द्विधा ते A, विधात्रे B, विधाते C.
3. B पुस्तके कथितेति नास्ति।
4. दशनादश A, शोभनादर्श B, C.
5. स्याश्च A, स्याद्य B, स्याः C.
6. वामस्कन्ध A, वामः स्कन्ध B, C.
7. भूषिता A, भूषिताम् B, C.
8. न्तु A, ञ्च B.
9. श्चाकर्ण A, श्चाकर्ण B, C.
10. श्वरम् A, श्वरी B, C.

महिषश्च तथा कार्य्यो भगवत्यग्रतः[1] स्थितः ।
अघज्ञातश्च[2] दैत्येन्द्रं देवी हन्तुं समुद्यता ॥९॥
त्रिशूलेन हतो गौर्य्या नागपाशेन पाशितः[3] ।
अधस्तान्महिषस्येह शिरश्छेद[4]समन्वितः ॥१०॥
मायावी महिषो दैत्यः संक्रुद्धो दंशिताधरः ।
सिंहस्थं दक्षिणं पादं वामं[5] महिषपृष्ठगम् ॥११॥
उत्क्रान्त्या रुधिरं दैत्यं वमन्तं संप्रदर्शयेत् ।
एवं लक्षणसंयुक्ता चण्डिका संप्रकीर्त्तिता ।
तयोर्गौर्य्यादि भेदेन कार्य्या सानेकधा पुनः ॥१२॥

इति हयशीर्षे महापञ्चरात्रे द्वादश साहस्रिके
आदिकाण्डे
त्रिंशः
गौरीप्रतिमालक्षण पटलः

आदितः श्लोक-संख्या—७२०

———

1. सम्भवत्यग्रतः A, भगवत्यग्रतः B, C. 2. तु B, च C, A.
3. पाशितः A, पाशितः B, C. 4. शिरश्छेद A, शिरश्छेद B, C.
5. वाम B, वामं A, C.

एकत्रिंशः पटलः

लिङ्गलक्षणम्

भगवानुवाच

लिङ्गस्य लक्षणं वक्ष्ये तन्मे निगदतः[1] शृणु ।
दैर्घ्यार्द्ध[2]मम्बुभिर्भक्त्या अ[2]क्त्वा भागत्रयं ततः ॥१॥
विष्कम्भं भूत[3]भागैस्तु चतुरस्रन्तु कारयेत् ।
आयाममूर्त्तिभिर्भक्त्या एकद्वित्रिक्रमान्न्यसेत् ॥२॥
ब्रह्मविष्णुशिवाङ्गेषु वर्द्धमानोऽयमुच्यते ।
चतुरस्रेऽस्य[4] कर्णार्द्धं गृह्य[5] केशेषु नाञ्जयेत् ॥३॥
अष्टाग्रं वैष्णवं भागं सिद्ध्यत्येव न संशयः ।
षोड़शास्रं ततः कुर्य्याद् द्वात्रिंशास्रं ततः पुनः ॥४॥
चतुःषष्ट्यस्रकं कृत्वा वर्त्तनं साधयेत् ततः ।
वर्त्तयेदथ लिङ्गस्य शिरो वै देशिकोत्तमः ॥५॥
विस्तारमथ लिङ्गस्य अष्टधा [6]संविभाजयेत् ।
भागार्द्धार्द्धन्तु संत्यक्त्वा[7] चक्राकारं[8] शिरोभवेत् ॥६॥
त्रिषु भागेषु सदृशमायामपदविस्तरम् ।
तद्विभागसमं लिङ्गं सर्वकामफलप्रदम् ॥७॥
दैर्घ्यं तस्य चतुर्थेन विष्कम्भं देवपूजिते ।
सर्वेषामेव लिङ्गानां लक्षणं शृणु साम्प्रतम् ॥८॥

---

1. निगदतः A, निगदितः B, C.
2. ······2 मम्बुभिर्भक्त्या बङ्गुभित्यक्त्वा A, (?) B, C.
3. भूक्त इति B, C पुस्तकयो र्नास्ति ।
4. हस्य A, यस्य ? B, C.
5. केशेषु नाञ्जयेत् A, कोणेषु प्रोञ्छयेत् B, C.
6. संविभाजयेत् A, सन्निभाजयेत् B, C.
7. संत्यक्त्वा A, सन्तज्य B, C.
8. चक्राकारं A, चन्द्राकारं B, C.

मध्यसूत्रं[1] समारुफाल्य ब्रह्मरूढ़ान्तिकं बुधः ।
षोड़शांशन्तु लिङ्गस्य षड्भागैर्भाजितो यदा ॥९॥
तदा[2] अमूलसूत्राभ्यां मानिमन्तरमुच्यते[3] ।
यवाष्टमुत्तमे कार्य्य[4] शेषाणां यवहानितः ॥१०॥
अर्चाभागं[5] त्रिधा कृत्वा ऊद्‌र्ध्वमेकं परित्यजेत् ।
अष्टधा तत् त्रयं[6] कृत्वा ऊद्‌र्ध्वभागत्रयंभजेत्[7] ॥११॥
ऊद्‌र्ध्वन्तु पञ्चमाद् भागाद् ग्राम्यलेखा प्रलम्बयेत्[8] ।
भागमेकं परित्यज्य सङ्गमं कारयेत् तयोः ॥१२॥
एतत् साधारणं प्रोक्तं लिङ्गानां लक्षणं मया[9] ।
सर्वसाधारणं वक्ष्ये पिण्डिकां तां निवोध मे[10] ॥१३॥
ब्रह्मभागप्रवेशञ्च ज्ञात्वा लिङ्गस्य चोच्छ्रयम् ।
न्यसेद् ब्रह्मशिलान् विद्वान् सम्यक् कर्म शिलोपरि ॥१४॥
तथा समुच्छ्रयं ज्ञात्वा पिण्डिकायां विभाजयेत् ।
द्विभागमुच्छ्रितं[11] पीतं विस्तारं लिङ्गसम्मितम् ॥१५॥
त्रिभागमन्ततः[12] ख्यातं कृत्वा पीठं विभाजयेत् ।
स्वमार्णार्द्धं[13] विभागेन वाहुल्यं परिकल्पयेत् ॥१६॥
बाहुल्यस्य त्रिभागेन मेखलामथ कल्पयेत् ।
खातं[14] स्यान्मेखलातुल्यं[15] क्रमान्नित्यन्तु कारयेत् ॥१७॥
मेखला षोड़शांशेन खातं वा तत्प्रमाणतः ।
उच्छ्रायं यत्तु पीठस्य विकारांशन्तु कारयेत् ॥१८॥

---

1. मध्यसूत्रं A, मध्यं सूत्र B, C.
2. तदा स A, तद्वैय B, C.
3. B, C पुस्तकयोर्नास्ति ।
4. मुत्तमे कार्य्यें A, मुत्तमैः कार्य्यं B, C.
5. अर्चाभागं A, आर्य्यभागं B, C.
6. तत्त्रयं A, त्रद्वयं B, C.
7. यजेत् B, त्यजेत् A, C.
8. प्रलम्बयेत् A, पुनस्त्वयेत् B, C.
9. लक्षणं मथा A, लक्षणान्मया B, C.
10. निवोध मे A, निवोधय B, C.
11. द्विभाग A, त्रिभाग B, C.
12. मन्त A, मध्य B, C.
13. प्रमाणार्द्धं A, स्वमानार्द्ध B, C.
14. खातं A, ख्यातं B, C.
15. तुल्यं A, तुल्य B, C.

भूमौ प्रविष्टमेकन्तु भागैकेन यष्टिका[1] ।
कण्ठं भागैस्त्रिभिः कार्य्यं भागैकेन यष्टिका[2] ॥१९॥
द्व्यंशेन चार्द्धयष्टिन्तु[3] एकांशांशेति यष्टिका[4] ।
भागं भागं प्रविष्टन्तु यावकन्तु[5] ततः पुनः ॥२०॥
निर्गमं भागमेकन्तु यावद्वै काययष्टिका[6] ।
प्रणालस्य[7] त्रिभागेन निर्गमस्तु त्रिभागतः ॥२१॥
मूले तुल्यप्रविष्टारमग्रे द्व्यंशेन चार्द्धतः ।
कथं निम्नस्तु कुर्व्वीत खातं[8] तच्चोत्तरेण वै ।
पिण्डिकासहितं लिङ्गमेतत् साधारणं स्मृतम् ॥२२॥

इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके आदिकाण्डे
(एकत्रिंशः)
लिङ्गलक्षण पटलः ॥ ३१ ॥

आदितः श्लोकसंख्या—७४२ ।

---

1. भागेकैकेन यष्ठिका A, भोगेकेन च पट्टिका B, C.
2. भागेकैकेन पट्टिका A, भागैकेन च पट्टिका B, C.
3. यष्टिन्तु A, पट्टिन्तु B, C.
4. एकांशां शेतियष्ठिका A, एकाङ्गा शेष पट्टिका B, C.
5. याचकन्तु A, यावत् कन्ठं B, C.
6. कायाष्टिका A, कायपट्टिका B, C.
7. प्रणालस्य A, प्राणालस्य B, C
8. च A, खातं B, C.

द्वात्रिंशपटलः

पिण्डिकालक्षणम्

भगवानुवाच

*अतःपरं प्रवक्ष्यमि प्रतिमानान्तु पिण्डिकाम् ।
दैर्घ्येण प्रतिमा तुल्या[1] तदर्द्धेन तु विस्तृता ॥१॥
उच्छ्रितायामतोऽर्द्धेन[2] सुविस्ताराद्धभागतः ।
त्रिभागेन तु वा तुल्यं त्रिभागेन तु मेखला ॥२॥
[3]खातन्तु तद्प्रमाणन्तु किञ्चिदुत्तरतोन्नतम् ।
विस्तारस्य चतुर्थेन प्रमाणस्य विनिर्गमः ॥३॥
समं मूलस्य विस्तारमग्रे कुर्य्यात् तदर्द्धतः ।
विस्तारस्य तृतीयेन तोयमार्गन्तु कारयेत् ॥४॥
पिण्डिकार्द्धेन वातुल्यं दैर्घ्यं देशस्य कीर्त्तितम् ।
कुशम्वा तुल्यदैर्घ्यञ्च[4] कृत्वा[5] सूत्रञ्च कारयेत्[6] ॥५॥
उच्छ्रायं पूर्व्ववत् कुर्य्याद् भाग षोड़शसंख्यया ।
अधस्तस्य द्विभागन्तु[7] कण्ठं कुर्य्यात् त्रिभागकम्[8] ॥६॥
शेषा[9] ह्येकैकशः कार्य्याः प्रतिष्ठा[10] निर्गतास्तथा ।
यष्टिका[11] पिण्डिका चेयं सामान्यप्रतिमासु च ॥७॥

---

1. तुल्य B, तुल्या A, C.
2. न तु A, B, C.
3. श्लोकांशोऽयं B, C पुस्तकयोर्नास्ति ।
4. तुल्यादैर्घ्यञ्च B तुल्यदैर्घ्यञ्च A, C.
5. ज्ञात्वा A, कृत्वा B.
6. सूत्रंप्रकल्पयेत् A, सूत्रञ्च कारयेत् B, C.
7. अधस्तस्य द्विभागन्तु A, अधः पटं विभागन्तु B, C.

* C पुस्तके परमिति नास्ति ।

8. त्रिभागिकम् A, B, त्रिभागिकम् C.
9. ह्ये A, B स्त्वे C.
10. प्रतिष्ठा A, प्रयिष्टा B, C.
11. यष्टिका A, पट्टिका B, C.

प्रासादद्वारमानेन प्रतिमा द्वारमुच्यते[1]।
[2]गजव्यालकसंयुक्ता प्रभास्याः प्रतिमासु च ॥८॥
पिण्डिकासु यथा शोभं कर्त्तव्या सततं हरेः।
सर्व्वेषामेव देवानां विष्णूक्तं मानमुच्यते[2] ॥९॥
देवीनामपि सर्व्वासां लक्ष्म्युक्तं मानमुच्यते।
किङ्कराद्याश्च कर्त्तव्याः सप्तसंस्थानसंयुताः[3] ॥१०॥
अर्द्धोत्थितविधाना[4] च[5] बाहुल्यान्तास्तथा तथा।
तथातथोपसंलक्ष्य कुर्य्याद् देशिकसत्तमः ॥११॥
अव्यक्तस्थापनं[6] नेष्टं[7] व्यक्ताया[8] मेकमण्डले[9]।
लौहजः शैलजो[9] दोष एकमूर्त्तौ न विद्यते ॥१२॥

इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके आदिकाण्डे।

[द्वात्रिंशः]

पिण्डिकालक्षणपटलः ॥३२॥

आदितः श्लोकसंख्या—७५४।

---

1. द्रव्य A, द्वार B, C.
2. ......2. "गजव्यालकेत्यतः" आरभ्य "विष्णूक्तं मानमुच्यते" एतावत् पर्य्यन्तं B, C पुस्तकयोर्नास्ति।
3. सप्तसंस्थान A, सप्तवाताल B, सप्तपट्टाल C.
4. अर्द्धोत्थिताविधाना A, अद्धोत्थिताविधाने B, C.
5. त्री...... त्तथा A, बाहुल्यान्तास्तथा तथा B, C.
6. नं A, नी B, C.
7. नेष्टं A, B, नष्टं C.
8. वक्ताया A, वक्तव्या B, C.
9. शिलजो B, शेलजा A, C.

त्रयस्त्रिंशपटलम्

कालपरीक्षणम्

भगवानुवाच

प्रतिष्ठापञ्चकं वक्ष्ये तन्निबोध चतुर्मुख।
परमात्मा हरिर्द्देवस्तच्छक्तिः श्रीरिहोदिता ॥१॥
श्रीर्देवी प्रकृतिः प्रोक्ता केशवः पुरुषः स्मृतः।
न विष्णुना विना देवी न हरिः पद्मया विना ॥२॥
अर्च्या[1] मूर्त्तिः स्मृतः कृष्णः पिण्डिका कमलालया।
तयोर्यो विधिना योगः साप्रतिष्ठा प्रकीर्त्तिता।
इच्छाफलार्थिभिस्तस्मात् प्रतिष्ठा क्रियते नरैः ॥३॥
आचार्य्यः पूर्व्वमेवोक्तो मूर्त्तिपाश्च मया तव।
येन तण्त्रेण[2] प्रारब्दा प्रतिष्ठा गुरुणा भवेत् ॥४॥
तन्त्रज्ञ[3] पारगाः शास्ता मूर्त्तिपाश्छिन्नसंशयाः।
षड़ङ्गविदुषः सर्व्वे मन्त्र ब्राह्मणपारगाः ॥५॥
एवंविधैर्वैष्णवैस्तु प्रतिष्ठामारभेद् गुरुः।
उत्तराशां स्थिते[4] भानौ शुक्लपक्षे सुरेश्वर ॥६॥
कृष्णपक्षान्तिमत्र्यंशाद्गते सुरगणार्च्चित[5]।
शुक्लस्याद्यं परित्यज्य प्रतिष्ठां कारयेद्बुधः ॥७॥
माघेमासि फाल्गुने वा चैत्रवैशाखयोरपि।
ज्यैष्ठेमास्यथवाषाढ़े सुयोगकरणन्विते[5] ॥८॥

---

1. अर्च्यां A, अर्च्चां B, C.
2. मयत्रेण B, तयत्रेण A, C.
3. तत्तन्त्र A, C, तन्मन्त्र B.
4. उत्तराशांस्थिते A, उत्तराशाश्रिते B, C.
5. सुरगणार्च्चित A, सुरगणार्च्चिते B, C.
6. सुयोगकरणान्विते A, शुभ योगकरान्विते B, C.

प्रतिपच्च द्वितीया च तृतीया पञ्चमी तथा।
सप्तमी दशमी चैव द्वादशी च त्रयोदशी ॥९॥
अष्टमी पौर्णमासी च प्रतिष्ठायांसुशोभनाः।
गुरुः सोमो बुधः शुक्रः प्रतिष्ठायां शुभावहाः[1] ॥१०॥
मेषो वृषोऽथ मिथुनः कर्कटो वृश्चिकस्तथा।
सिंहः कन्या च सततं विज्ञेयाः शान्तिकारकाः ॥११॥
उत्तरासु तथा मूले रौद्रे पुष्येऽथ[2] शस्यते।
वैष्णवे चानुराधे च रेवत्यां रोहिणीसु च ॥१२॥
अश्विन्यामथ चित्रायां भरन्याञ्च पुनर्व्वसौ।
प्रतिष्ठां कारयेद् विद्वान् नक्षत्रे मृगशीर्षके ॥१३॥
अयने विषुवे चैव षड़शीतिमुखे तथा।
मित्रं परममित्रञ्च सम्पत् क्षेमञ्च साधकम् ॥१४॥
तारापञ्चकमेतच्च प्रतिष्ठायां प्रशस्यते।
गरं विष्टिं सकिन्तुघ्नं शकुनं सचतुष्पदम्[3] ॥१५॥
वर्जयेत् सर्व्वयत्नेन प्रतिष्ठायां सुरेश्वर।
विष्कम्भमतिगण्डञ्च शूलं परिघमेव च ॥१६॥
गण्डं व्याघातकञ्चैव वैधृतिं वज्रमेव च।
व्यतीपातं हर्षणञ्च योगानेतान् विवर्ज्जयेत् ॥१७॥
न शस्तं सग्रहे[4] (?) नित्यं तथा वै दक्षिणायने।
लग्नेतु सुस्थिरे कार्य्यं स्थिरांशे सुरसत्तम ॥१८॥
कर्त्तुश्चोपचयोपेते मुहूर्त्ते शोभने[5] द्विज।
मैत्रे विराजे सावित्रे श्वेते वा बासवे शिवे[6] (?) ॥१९॥

1. शुभावहाः A, शुभावहः B, C.
2. हय A, च B, C.
3. शकुनं स चतुष्पदम् A, शकुणिञ्च चतुष्पदम् B, C.
4. सग्रहे A, B, सग्रहो C.
5. गोतमे B, शोभने A, C,
6. शिवे A, B, शवे C. (पृष्ठ नं० ६१ देखिये)

अभिजिद्रोहिणीनाञ्च मुहूर्त्ते पद्मसम्भव[1]।
गान्धर्वे[2] वा स्थापयीत हरिं सुरगणार्चितम् ॥२०॥
आदित्यस्य बलं लब्ध्वा लग्नं[3] शुभनिरीक्षितम्।
चन्द्रताराबलं प्राप्य स्थापयेत् पुरुषोत्तमम्।
सुग्रहे च सुनक्षत्रे[4] कुर्य्यात्तत्राधिवासनम्[5] ॥२१॥
इति हयशीर्षे पञ्चरात्रे कालपरीक्षापटलम् ॥३३

---

1. पद्मसम्भवे B, C, पद्मसम्भव A. 2. गन्धर्व्वे A.
3. लग्ने शुभनिरीक्षिते B, लग्नं शुभ निरीक्षितम् A.
4. स्वग्रहे च स्वनक्षत्रे सुग्रहे च सुनक्षत्रे A, B, C,
5. त्तुवा A, त्तत्रा B, C.

चतुस्त्रिंशपटलः

दिक्पालपूजा

भगवानुवाच

प्रासादं वेष्टयित्वा तु कुर्य्याद्गुप्ततरं बुधः।
कृत्वा गुप्तं ततः पश्चाद् यागमण्डपमारभेत् ॥१॥
गर्भसूत्रन्तु निःक्षिप्य प्रासादस्याग्रतो गुरुः।
कृत्वाभूमिन्तु निक्षिप्य मण्डपं सूत्रयेत्ततः ॥२॥
हीनस्तु मण्डपः कार्य्यो हीनेत्वायतने सदा।
उत्तमेषूत्तमः कार्य्यो मध्यमे मध्यमस्तथा ॥३॥
दशाष्टहस्तं हीनन्तु मध्यं द्वादशषोड़शम्।
विंशहस्तं चतुर्व्विंश मुत्तमस्योत्तमं द्विज ॥४॥
चतुर्हस्तादिमानानां प्रासादानां यथाक्रमम्।
मण्डपानष्टहस्तादि कल्पयेद् वेदवृद्धितः ॥५॥
समवृत्तं[1] चतुर्द्वारं चतुस्तोरणभूषितम्।
विचित्रस्तम्भविन्यासं रचना चरितं[2] शुभम् ॥६॥
धूमनिर्गमनोपेतं[3] मण्डपं कारयेद् बुधः।
स्नानार्थं कलसार्थञ्च स्नानद्रव्यार्थमेव[4] च ॥७॥
जलनिर्गमनोपेतमर्द्धेन स्नानमण्डपम्।
ऐशान्यां कलसार्थञ्च[5] तस्माद्दक्षिणगोचरे ॥८॥
पूर्व्वस्यां मण्डपं कुर्य्याद्[6] यागद्रव्यार्थमायतम्।
त्रिभागेनाथवार्द्धेन[7] कुर्य्याद्वेदीं सुशोभनाम्।
हस्तमात्रोच्छ्रिता कार्य्या मध्ये सम्यग्व्यवस्थिता ॥९॥

---

1. समवृत्तं A, सम(?) सूत्रमिति B, C.
2. विन्यासं रचनाचरितं A, विन्यासरचताचरित मिति B, C.
3. धूमनिर्गमनोपेतं A, धूमस्य निर्गमोपेतामिति B, C.
4. स्नान A, योग B, C.
5. ञ्च A, B, न्तु C.
6. कुर्य्यात् A, B, कार्य्यं C.
7. त्रिभागे A, C, बिभागे B.

मण्डपं मण्डये दार्द्रशाखाभिस्तु समन्ततः ।
बिमलेन वितानेन पताकाभिश्च भूषयेत् ॥१०॥
दर्पणैश्चामरैर्घण्टैस्तम्भान् वस्त्रैर्विभूषयेत् ।
कलसैर्घटिकाभिश्च साधारैर्गड़ुकैस्तथा ॥११॥
मण्डपंभूषयित्वैवं जाह्नवीबालुकांशुभाम् ।
वाह्यदेशेषुविकिरेत् पञ्चगव्येन प्रोक्षयेत् ॥१२॥
पाषण्डान् नास्तिकान् सर्व्वान् देवब्राह्मणदूषकान् ।
दीक्षाबहिष्कृतान् सर्व्वान् हेतुवादरतांस्तथा ॥१३॥
निर्व्वार्य्यप्रारभेत् कर्म्म वैष्णवैर्दीक्षितैः सह ।
आहृत्य सर्व्वद्रव्याणि श्रुक्श्रु (व ?) वौ[1] विष्टराणि च ।
यज्ञपात्राणि सर्व्वाणि स्थाप्य यत्नेन देशिकः ॥१४॥
श्वेतवस्त्रपरीधानः सोष्णीश श्चन्दनोक्षितः ।
अङ्गुरीयकहस्तश्च[2] सर्व्वालङ्कारभूषितः ॥१५॥
आत्मानं विष्णुवत् पूज्य गन्धपुष्पादिभिर्गुरुः ।
ध्यात्वा देहं[3] विष्णुरुपं मन्त्रात्मकं ततः शुचिः[4] ॥१६॥
हरिं प्रणम्य विज्ञाप्य मूर्त्तिपानपि पूजयेत् ।
सितैः पुष्पैर्वस्त्रयुग्मै रङ्गुरीयैरथाङ्गदैः ॥ १७॥
निपुणैः शिल्पिभिः सार्द्धं ततः कर्म्म समाचरेत्[5] ।
पञ्चगव्येन सत्कृत्य शोध्य कुम्भान्[6] विचक्षणः ।
स्थापयेन्मूर्त्तिपान् पश्चात् कुण्डे कुण्डे तु देशिकः ॥१८॥
चतुष्कोणं भवेत् कुण्डं पूर्व्वास्यां दिशि सर्व्वदा।
अर्द्धचन्द्रं भवेद् याम्यां बारुन्यां वर्त्तुलं भवेत् ॥१९॥

1. श्रुक् श्रुव वौ A, B, श्रुक्श्रुवं C.
2. अङ्गुरीयक A, साङ्गुरीयक B, C.
3. देवं A, देहं B, C.
4. ततः शुचिः A, B, शुचिन्ततः C.
5. समाचरेत् A, समारभेत् B, C.
6. कुम्भान् A, कुण्डान् B, C.

पञ्चाशमुत्तरे भागे कुण्डं स्याद्द्विजसत्तम ।
अश्वथोडुम्बरश्चैव[1] न्यग्रोधः प्लक्ष एव च[2] ॥२०॥
तोरणार्थंतु कथिता पूर्व्वादिषु यथाक्रमम् ।
सुशोभनं भवेत् पूर्व्वे सुभद्रं दक्षिणे भवेत् ॥२१॥
सुकर्म्मा पश्चिमे भागे सुहोत्रन्तु तथोत्तरे ।
एकहस्तं खनेद्भूमौ चतुर्हस्तं तथोच्छ्रयेत् ।
द्विहस्तान्तरमन्योऽन्यं तोरणं संप्रकल्पयेत् ॥२२॥
तिर्य्यक् फलकमानं स्यात् स्तम्भानामर्द्धमानतः ।
श्यो (स्यो) ना पृथिवि (?) मन्त्रेण[3] स्थाप्याः पूज्याश्च[4] तोरणाः ॥२३॥
शुक्लवस्त्रयुगच्छन्नान् दर्भञ्जलपिसंयुतान् ।
पुष्पमालापरिक्षिप्तां स्तोरणान् परिकल्पयेत् ॥२४॥
वृत्तं वा चतुरस्रं वा द्विषट्काष्ठाङ्गुलन्तु वा ।
षट्चतुर्वाङ्गुलं[5] कार्य्यं[6] तोरणं निर्व्रणं समम् ॥२५॥
तोरणस्तम्भमूलेषु कलसान् मङ्गलाङ्कुरान् ।
प्रदद्यादुपरिष्टात्तु[6] कुर्य्याच्चक्रं सुदर्शनम् ॥२६॥
फलसमूर्द्धमानंवा[7] *वसुभागेन कल्पयेत् ।
पञ्चहस्तप्रमाणन्तु ध्वजं कुर्य्याद्विचक्षणः ॥२७॥
वैपु (ण्य ?) ल्यञ्चास्य कुर्व्वीत षोड़शाङ्गुलसम्मितम् ।
सप्तहस्तोच्छ्रितं चास्य कुर्य्याद्दण्डं सुरोत्तम ॥२८॥
सप्तहस्तास्ततोदैर्घ्याद्[8] विस्ताराद्द्वादशाङ्गुलाः ।

---

1. अश्वत्थोडुम्बर ज्चैव A, अश्वत्थोडुम्बरौ चैव B, C.
2. प्लक्ष एव च A, B, प्लक्षमेव च C.
3. श्यो (स्यो) ना पृथिवि ? मन्त्रेण A, श्योना पृथिवीते मन्त्रेण B, C.
4. पूज्यास्तु A, C, पूज्याश्च B.
5. षट्चतुर्वाङ्गुलं A, षट्चतुरङ्गुलं कुर्य्यात् B, C.   6. तु A, च B, C.
* वर्द्धमानं वेति ख ।   7. मूर्द्धमानं वा A, वर्द्धमानं वा B, C.
8. सप्तहस्तास्ततो दैर्घ्यात् A, सप्तहस्ता ध्वजाः कार्य्या B, C.   § सप्तहस्तोध्वजा (?) कार्य्या (?) इति ख ।

द्विपञ्चहस्तदण्डेषु पताकास्तु निवेशयेत् ॥२९॥
वाह्यदेशे मण्डपस्य तोरणाभ्यन्तरे तथा ।
अष्टौ ध्वजाः स्थापनीयाः पूर्व्वादिक्रमयोगतः ॥३०॥
अरुणोऽग्निनिभश्चैव कृष्णःशुक्लोऽथ पीतकः ।
रक्तवर्णस्तथा श्वेतः सर्व्ववर्णस्तथैव च ॥३१॥
कुमुदः कुमुदाक्षश्च[1]* पुण्डरीकोऽथ[2]वामनः ।
शङ्कुकर्णः सर्व्वनेत्रः सुमुखः सुप्रतिष्ठितः ॥३२॥
इत्येते विष्णुलोकस्य दिक्पालगणनायकाः ।
कोटिसंख्यर्गणैर्युक्ताः पूजनीया यथादिशि ॥३३॥
नवेन चित्रवर्णेन वितानं कारयेत् शुभम् ।
अथवा शुक्लवर्णेन मध्ये जलजभूतम् ॥३४॥
उत्तमाधममध्यन्तु प्रमाणञ्चास्य कीर्त्त्यते ।
मण्डपस्य प्रमाणन्तु ज्येष्ठं तत्स्याद्वितानकम् ।
मध्यमं वेदिकामात्रं कनिष्ठं मण्डलस्य तु[3] ॥३५॥
शातकुम्भमयान् कुर्य्याद्राजतान् शुल्वजानथ ।
जलाढ़कप्रपूरांस्तु लोहजान् कारयेद्दृढ़ान् ॥३६॥
मृन्मयान् कलसान् वापि पक्वविम्वोपयान्शुभान् ।
अष्टाविंशाधिकशतपल[4]पूरांस्तु मृन्मयान् ॥३७॥
अवक्रान् स्फोटरहितान् कालमण्डलवर्जितान् ।
आहृत्य कलसान् वस्त्र-पूततोयेन पूरयेत् ॥३८॥
सहिरण्यान् वस्त्रयुग्म-वद्धकण्ठान् निवेशयेत् ।
तोरणानां[5] वहिः स्थाप्याः प्रागादिषु यथाक्रमम् ।
वेदिकायाश्चतुष्कोणे चतुरः कलसान् न्यसेत् ॥३९॥

---

1. * कुमुदाख्यश्च A, 1 कुमुदाक्षश्च B, C.
2. पुण्डरीकोऽथ A, B, पुण्डरीकश्च C.
3. तु A, च B, C.
4. °शतपल° A, B, 'शतान् जल' C.
5. तोरणाश्च A, तोरणानां B, C.

आजिघ्र इति मन्त्रेण कलसान् स्थापयेद्बुधः ।
इन्द्रादिलोकपालांस्तु कलसेषु यथाक्रमम्* ।
पूजयेद्गन्धपुष्पाद्यैर्मन्त्ररावाह्य देशिकः[1] ॥४०॥

तद् यथा—

आयाहीन्द्र महाराजाधिराज वज्रहस्त स्ववल[2] (?) वाहनावृत इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ[3] पूर्व्वद्वारमभिरक्ष २-इत्यावाह्य ॐ त्रातारमिन्द्र-मित्यनेनार्घ्यं दत्त्वा गन्धादिभिरर्च्चयेत् ॥१॥

ॐ§ आयाहि चित्रभानो महाराजाधिराज शक्तिहस्त स्व(सु) वलवाहनावृत इहागच्छ इहागच्छ तिष्ठ† आग्नेयीं दिशमभिरक्ष रक्ष इत्यावाह्य ॐअग्निर्मूर्द्धा दिव इत्यनेनार्घ्यं दत्त्वा गन्धादिभिरभ्यर्च्चयेत्[3] ॥२॥

ॐ आयाहि यम महाराजाधिराज स्व (सु)वलवाहनावृत[4] दण्डहस्त रक्तान्तायतलोचन इहागच्छ इहागच्छ तिष्ठ तिष्ठ[5] दक्षिणद्वारमभिरक्ष रक्ष इत्यावाह्य ॐ वैवस्वतं सङ्गमनमित्यनेनार्घ्यं दत्त्वा गन्धादिभिरभ्यर्च्चयेत् ॥३॥

ॐ आयाहि निऋते[6] महाराजाधिराज स्व (सु)वलवाहनावृत खड्गहस्त महावल[7] इहागच्छ* तिष्ठ तिष्ठ नैर्ऋतीं दिशमभिरक्ष रक्षेत्यावाॐ † ॐ एष ते निर्ऋते[8] इत्यनेनार्घ्यं दत्त्वा गन्धादिभिरभ्यर्च्चयेत् ॥४॥

---

* वेदिकाया इत्यादितः कलसेषु यथाक्रममित्यन्तं तादषट्कं "क" पुस्तके नास्ति ।

1. देशिकः A, पूजयेत् B, C. 2. स्ववल A, सुवल B, C.

3. इह तिष्ठ इह तिष्ठ A, B, तिष्ठ तिष्ठ C.

§ इति ख पुस्तके नास्ति ।

† अत्र इहेति तिष्ठेति वीप्सा व न दृश्यते ।

3. °रभ्यर्च्चयेत् A, B, रर्चयेत् C.

4. C पुस्तके स्ववलवाहनावृत इति न दृश्यते ।

5. C. पुस्तके तिष्ठ२ इति नास्ति । 6. निऋते A, B, नैऋत C.

7. C पुस्तके महावल इति नास्ति । 8. निऋते A, B, नैऋत C.

* अत्र वीप्सा न दृश्यते ।

† प्रागुक्तयमपूजया अर्घ्यदानमन्त्रात् एतदन्तोंहश ख पुस्तके नास्ति ।

8.

(?)

ॐ आयाहि वरुण महाराजाधिराज पाशहस्त स्व(सु)वलवाहनावृत हागच्छ इहागच्छ तिष्ठ तिष्ठ पश्चिमद्वारऊर्द्ध्वां दिश-* मभिरक्ष रक्षेत्यावाह्य ॐ गुरु हि हि राजा वरुणश्चकारेत्यनेनार्घ्यं दत्त्वा गन्धादिभिरभ्यर्च्चयेत् ॥५॥

ॐ आयाहि पवन[1]† महाराजाधिराज ध्वजहस्त स्व (सु)वलवाहनावृत इहागच्छ २ तिष्ठ २ वायवीं दिशमभिरक्ष रक्षत्यावाह्य ॐ वात आवातु भेषज मित्यनेनार्घ्यं दत्त्वा गन्धादिभिरभ्यर्च्चयेल् ॥६॥

ॐ आयाहि सोम महाराजाधिराज शङ्खहस्त स्व(सु)वलवाहनावृत इहागच्छ २ तिष्ठ २ उत्तरद्वारमभिरक्ष रक्षेत्यावाह्य ॐ सोमं राजानमित्यनेनार्घ्यं दत्त्वा गन्धादिभिरभ्यर्च्चयेत् ॥७॥

ॐ आयाहीशान महाराजाधिराज शूलहस्त स्व(सु)वलवाहनावृत इहागच्छ २ तिष्ठ २ ऐशानीं दिशमभिरक्ष रक्षेत्यावाह्य ॐ ईशान मस्येत्यनेनार्घ्यं दत्त्वा गन्धादिभिरभ्यर्च्चयेत् ॥८॥

ॐ आयाहि चतुर्म्मुख सर्व्वलोकाधिपते स्रुक्श्रुवहस्त* स्व(सु)-वलवाहनावृत इहागच्छ २ तिष्ठ २ ऊर्द्ध्वां दिशमभिरक्ष रक्षेत्यावाह्य ॐ हिरण्यगर्भः समवर्त्तताग्र इत्यनेनार्घ्यं दत्त्वा ऐशान्यां गन्धादिभिरर्च्चयेद् ॥९॥

ॐ आयाह्यनन्त महाराजाधिराज स्व(सु)वलवाहनावृतलाङ्गलहस्त इहागच्छ २ तिष्ठ तिष्ठाधोदिशमभिरक्ष रक्षेत्यावाह्य ॐ नमोऽस्तु सर्पेभ्य इत्यनेनार्घ्यं दत्त्वा गन्धादिभिरर्च्चयेत् ॥१०॥

एवमभ्यर्च्च्य लोकेशांस्ततो भूमिपरिग्रहम् ।
कुर्व्वीत वक्ष्यमाणन्तत् साम्प्रतं श्रृणु सुव्रत[2] ॥४१॥
इति हयशीर्षे पञ्चरात्रे दिक्पालपटलम् ।*॥३४॥

---

* ऊर्द्ध्वां दिशमिति ख पुस्तके नास्ति ।

† स्रुगित्यादिविशेषणं ख पुस्तके नास्ति ॥

1. पवन A, वायो B, C.

2. सुव्रत A, सत्तम B, C.

दिक्पाललक्षणपटलम् इति ख ।

पञ्चत्रिंश पटलम् ।

भगवानुवाच ।

व्रीहीनाहृत्य देवेश वासुदेवेन चार्च्चयेत् ।
क्षिपेच्च नारसिंहेन पातालमुषले[1]न तु ॥
सिद्धार्थकान् क्षिपेद्धया[2]यन् सिंहमन्त्रेण मन्त्रितान् ।
रक्षोघ्नान् पञ्चगव्येन प्रोक्षयेद् भूमिमादरात् ॥
ततस्ताम्रमयं कुम्भं मृन्मयं वा नवं दृढ़म् ।
जलपूर्णं स्थापयित्वा सरत्नं करकायु[3]तम् ॥
ऐशान्यामर्च्चयेत् तस्मिन् साङ्गं गन्धादिना हरिम् ।
अस्त्रमन्त्रेण करकां शतधारां तमर्च्चयेत् (?) ।
तद्धाराच्छिन्नया सिञ्चेन्मण्डपं तं[4] प्रदक्षिणम् ॥
कुम्भं तं पृष्ठतो नीत्वा कुम्भमन्त्रेण देशिकः ।
व्रीहीन् संहृत्य सर्व्वांस्तु कुम्भं तत्रोपरि न्यसेत् ॥
पुनः संपूजयेद्विष्णुं कलसेषु समाहितः ।
वस्त्रयुग्मेन कलसमेकेन करकां वुधः ॥
छादयित्वा ततो गृह्य करणीं मण्डलं लिखेत् ।
चतुरस्रं चतुर्द्वारं चक्राब्जं षोड़शारकम् ॥
पञ्चवर्णेन चूर्णेन द्वादशारमथापि वा[5] ।
वेद्यामेवं लिखित्वा च मण्डपे पूर्व्वदक्षिणे ।
चतुर्हस्तं चतुष्कोणं मध्ये पङ्कजभूषितम् ॥
चतुर्द्वारन्तु चूर्णेन स्वस्तिकं मण्डलं लिखेत् ।
तदू[6]र्द्ध्वं न्यस्य पर्य्यङ्कं कुशान् संस्तावयेत्त[7]तः ॥

---

1. तु A, च B, C.
2. ध्यायन् A, नित्यं B, C.
3. सरत्नं करकायुतं A, सरत्नकरकायुतम् B, C.
4. तं A, B. तु C.
5. A B पुस्तकयोः वा इति नास्ति वा C.
6. ततोऽर्द्धं A, तदूर्द्ध्वं B, C.
7. सभारयेत्ततः A, संस्तारयेत्ततः B, C.

योगे[1] योगेति मन्त्रेण गन्धतोयेन प्रोक्षयेत् ।
तूलिकां विन्यसेत्तत्र दिव्यपट्टांशुकान्विताम् ।।
उपधानद्वयं दत्त्वा पार्श्वे गण्डूकमेव च ।
कपोलधारणं दत्त्वा कुर्य्यादूर्द्ध्वं वितानकम् ।। १२
पुष्पमालापरिक्षिप्तं मुक्ताहारोपशोभितम् ।
कुर्य्यात् पुष्पगृहं हृ[2]द्यं मलयागुरुधूपितम् ।।
विद्याधिपास्तु संपू[3]ज्याः शक्त्या दिक्षु विदिक्षु[4] च ।
विष्णुर्मधुलिहा चैव तथैव च त्रिविक्रमः ।।
वामनश्चापि दिक्ष्वेते पूर्व्वाद्यासु व्यवस्थिताः ।।
श्रीधरश्च हृषीकेशः पद्मनाभस्तथैव च । १४
दामोदरश्च संपूज्या आग्नेयादिव्यवस्थिताः ।।
एवमर्च्च्य ततः पश्चात् ऐशान्यां स्नानमण्डपे ।
चतु(:)स्तम्भयुते रम्ये तन्मध्ये वेदिका शुभा ।।
चतुरस्रा चतुर्द्दिक्षु जलनिर्गमनान्विता[5] ।।
क्षीरिवृक्षोद्भवं पीठं मध्ये तस्यां निवेशयेत् ।
स्नानद्रव्याणि सर्व्वाणि समानीय विचक्षणः ।। १६
निःक्षिप्य स्नानकुम्भेषु कुम्भांस्तानाधिवासयेत् ।
रत्नानि च चतुर्द्दिक्षु सिद्धद्रव्यान्विताः शुभाः ।।
कलमाः स्थापनीयाशु अभिषेकार्थमादरात् ।
वटोदुम्बरकाश्व[6]त्थात् चम्पकाशोकज(?) द्रु[7]मात् ।। २०

---

1. योगे इत्यतः पूर्व्वं ओमित्याधिकं C पुस्तके वर्त्तते ।
2. पुष्पगृहं हृद्यं A, B., पुष्यं गृहं कृत्यं C.
3. विद्याधिपास्तु संपूज्याः A, B. विद्याघिपस्तु C.
4. शक्त्या दिक्षु विदिक्षु च A, B, शय्यायां ? दिक्षु दिक्षु च ? C.
5. नान्विता A, B. सान्विता C.
6. काश्वत्थात् A, B. काश्वत्थान् C.
7. जद्रुमात् A, B, जद्रुमान् C.

पालाशार्ज्जुनप्लक्षा[1]ञ्च कदम्बवकुलाम्रजान् ।
पल्ल[2]वांस्तु समानीय पूर्व्वकुम्भे विनिक्षिपेत् ॥
पद्मकं रोचनां दुर्व्वां दर्भपिञ्जलमेव च ।
जातीपुष्पं कुन्दपुष्पं चन्दनं रक्तचन्दनम् ॥
सिद्धार्थं तगरञ्चैव वञ्जु[3]लं दक्षिणे न्यसेत् ।
सुवर्णं रजनञ्चैव कूलद्वयमृदं तथा ॥
नद्याः समुद्रगामिन्या विशेषाज्जाह्लवी मृद[4]म् ।
गोमयञ्च यावन् शालीन् तिलांश्चैव परे[5]न्यसेत् ॥
विष्णुपर्णीं श्यामलतां भृङ्गराजं शतावरीम् ।
गुडुचीं सहदेवञ्च विन्यसेदुत्तरे घटे[6] ॥
फलान्युदकयुक्तानि आग्नेय्यां विन्यसेद् घटे ।
पञ्चगव्यस्तु नैर्ऋत्यां कुम्भे कृत्वाभिमन्त्र[7]येत् ।
वटाश्वत्थपलाशानां विल्वस्योदुम्वर[8]स्य च ॥
कषायोदकसंयुक्तं वायव्यां कलसं न्यसेत् ।
कुमारीममृताञ्चैव शतमूलीं शता[9]वरीम् ॥
सह[10]देवीं वचां सिंहीं वलां व्याघ्रीं मलक्षणाम् ।
ऐशान्यामपरे कुम्भे मङ्गला[11]ख्यं निवेशयेत् ॥
वल्मीकमृत्तिकां सप्तस्थानोत्थामपरे न्यसेत् ।
जाह्लवीवालुका तोयं विन्यसेदपरे घटे ॥

---

1. प्लक्षाच्च A, B, प्लक्षांस्तु C.
2. पल्लवास्तु A, B, पन्नवांस्तु C.
3. वञ्जूलं A, B, तण्डुलं C.
5. जलं A, B, मृदं C.
5. वपरे A, B, वा परे C.
6. विन्यमेदुत्तरे घटे A, विन्यसेच्च महौषधीम् C.
7. कृत्वाभिमन्त्रयेत् A, कृत्वाभिमान्त्रित B, C. । A पुस्तकपादटीकायां कृत्वाभिमन्त्रितमिति पाठोऽपि दृश्यते ।
8. दुम्वरस्य A, डुम्वरस्य B, C.
9 सहावरीम् A, शतावरीम् B, C.
10. सहदेवीं A, सहदेवां B, C.
11. मङ्गलाख्यं A, मङ्गलाख्यां B, C.

वराहवृषनागेन्द्र विषाणोद्धृतमृत्तिकाम् ।
कूलद्वयमृदं नद्या विन्यसेदपरे घटे ॥
मृत्तिकां पद्ममूलस्य कुशस्य त्वपरे घटे ।
तीर्थपर्व्वतमृद्भिस्तु युक्तमप्यपरे न्य[1]सेत् ॥
नागकेशरपुष्पञ्च काश्मीरमपरे न्यसेत् ।
चन्दनागुरुकर्पूरैः पूर्य्यं चैवा[2]परे न्यसेत् ॥
वैदूर्य्यं विद्रुमं मुक्तां स्फटिकं वज्रमेव च ।
एतान्येकत्र निःक्षिप्य स्थापयेद्देवसत्तम ॥
नदीनदतड़ागानां सलिलैरप[3]रं न्यसेत् ।
एकाशीतिपदे चान्यान् मण्डपे कलसान् न्यसेत् ॥
पूरितान् गन्धतोयेन धान्यस्थां स्तांस्तु मन्त्रयेत् ।
श्रीसूक्तेन समस्तेन सर्व्वानिव सकृत् सकृत् ॥
कलसानाधिवास्यैवमर्घ्यादीन् विनिवेशयेत् ।
यवं सिद्धार्थकं गन्धं कुशाग्रं चाक्षतं तथा ।
तिलान् फलं तथा पुष्पामर्घ्यार्थं पूर्व्वतो न्यसेत् ॥
पद्मं श्यामलतां दूर्व्वां विष्णुपर्णीं कुशांस्तथा ।
पाद्यार्थं दक्षिणे भागे स्थापयेद्देशिकोत्तमः ॥
स्थापयेद् पश्चिमे भागे मधुपर्कं सुसं[4]वृतम् ।
कक्कोलकं लवङ्गञ्च तथा जातीफलं शुभम् ॥
उत्तरे स्थापयेद् भागे द्रव्यमाचमनाय तु[5] ।
आग्नेय्यां स्थापयेत् पात्रं पूर्णं दूर्व्वाक्षतैर्बुधः ।
नीराजनार्थं देवेश देवदेवस्य सर्व्वदा ।
नैर्ऋत्यामुदकं गन्धयुक्तं स्नानाय विन्यसेत् ॥

---

1. घटे A, न्यसेत् B, C.
2. ······श्चा A, B, पूर्य्यंचवा C.
3. रपरं A वपरे B, C.
4. सुसंवृत्तम् A, सुसम्मितम् B, C.
5. तु A, च B.

उद्वर्त्तना[1]र्थं वायव्यां गन्धपिष्टं निवेशयेत् ।
न्यसेदामलकं पात्रे मुरामांसीयुतं शुभ[2]म् ।।
सहदेवां सदा भद्रां कुशाग्रान् रजनीं तथा ।
एशान्यां विन्यसेत् पात्रे शिरीषं सूर्य्य[3]वर्त्तिनीम् ।।
निर्मञ्छनाय देवस्य स्थापकः सुसमा[4]हितः ।
अष्टौ दिक्षु न्यसेद् विद्वान् धातु[5] यष्टि प्रदीपकान् ।। ८५
शङ्खं चक्रञ्च श्रीवत्सं कौ[6]स्तुभं पङ्कजादिकम् ।
हेमादि पात्रे कृत्वा तु गोमयेनाथ पत्र[7]कैः (?) । ८६
नीराज[8]नार्थं देवस्य तथा वै पुष्पजातयः ।।
स्थपनीया स्तथा चान्ये मङ्गल्याः स्नानचोदिताः ।। ८७

इति हयशीर्षे पञ्चरात्रे कलसाधिवासनपटलम् ।।३५।।

---

1. उद्वर्त्तनाय A, उद्वर्त्तनार्थं B, C. 2. तथा B, C, शुभम् A.
3. वर्त्तिनीम् A, B, वर्त्तिनम् C.
4. पादद्वयमिदं B, C पुस्तकयोर्नास्ति । 5. धातु A, B, लौह C.
6. कौस्तुभं A, B, कलसं C. 7. नल्वकैः A, B, पत्रकैः C.
8. नीराजनाय A, C. नीराजनार्थं B.

षट्त्रिंश पटलम् ।

भगवानुवाच ।

अतः संजनयेद्* वह्निं वैष्णवं विधिना गुरुः ।
ऐशान्यां गुरुकुण्डे तु प्राङ्मुखोदङ्मुखोऽपि वा ॥ 1
तत्रैव होमयेद् विष्णुगायत्र्या[2] घृतमादरात् ।
अष्टोत्तरशतं हुत्वा सम्पात विधिना सुधीः ॥ 2
सम्पाताज्येन कलसान् प्रोक्ष्य देशिकसत्तमः ।
लिप्तायां कारुशालायामुपतिष्ठेत संयतः ॥ 3
व्राह्मणैर्वैष्णवैः सार्द्धं मूर्त्तिपैः शिल्पिभिः सह ।
महता व्रह्मघोषेण सहायैर्वलवत्तरैः ॥ 4
काहला[3] शङ्खशब्दैश्च भेरीमुरज निस्वनैः ।
वीणावेणुस्वनैर्हृद्य दिव्यगन्धस्वनैस्त[4]था ॥ 5
आचार्य्यः प्राङ्मुखो भूत्वा कुर्य्यात् कौतुकवन्धनम् ।
विष्णवे शिपिविष्टे[5]ति गौरसिद्धार्थकेन तु ॥ 6
ऊर्णामयेन सूत्रेण नि[6]म्बवदूर्वान्वितेन च ॥
दुकूल वस्त्रे[7] वद्ध्वा तु दक्षिणे वद्धयेत् करे ॥ 7
देशिकस्यापि कर्त्तव्यं करे कौतुकबन्धनम् ॥
ततो विकल्प्य वेदा[8]स्त्रं(?) तण्डूलैः पञ्चरङ्गकैः ॥ 8
तन्मध्ये प्रतिमां स्थाप्य स्थाप्य चै[9]व यथाविधि ॥

---

* संजनये A संज्वलये B, C.

2. यिष्णुगायत्र्या A, B, विष्णुं गायत्र्या C.

3. काहाला B, C. काहला A.

4. हृद्यैस्तिय्यैगग्गीतस्वनैरिति B, C.

5. शिपिवेष्टेति A, B, शिविपिष्टेति C.

6. निम्वं(?) निम्व B, C.

7. वस्त्रे A वस्त्रै B, C.

8. देवास्त्रं A वेदास्त्रं B, C.

9. देव A चैव B, C.

वस्त्रयुग्मेन संस्था[1]द्य पूज्य गन्धादिना तु ता[2]म् ।
चामरैस्तालवृन्तैश्च वीजयेन्मङ्गलान्विता[3]म् ॥
शिविकायां निवेश्याथ प्रतिमां संस्तवे(रे ?) ततः ।
ॐ नमस्तेर्च्चे सुरेशानि प्रणीते विश्वकर्म्मणा ॥
प्रभाविताशेषजगद्धात्रि तुभ्यं नमो नम[4]: ।
त्वयि सम्पूजयामीशे नारायणमनामयम् ॥
रहिता शिल्पदोषैस्त्वमृद्धियुक्ता सदा भव ॥
एवं विज्ञाप्य प्रतिमां नयेत्तां स्नानमण्डपम् ।
ध्रियमाण वितानेन ब्रह्मघोषेण तां वुधः ॥
भद्रपीठे समारोप्य भद्रं कर्णेति कीर्त्तयेत् ।
स्नापयेच्छुद्धतोयेन स्तद्धवत्या तु देशिकः ॥
स्नापिता गन्धतोयेन शिल्पिदोषै विंमुच्य[5]ते ॥
मन्त्रै र्गन्धादिनाभ्यर्च्च्य छादयेत् शुक्लवाससा ।
पूजयित्वा तु प्रतिमां शिल्पिनं तोषयेत् ततः ॥
गन्धपुष्पादिभि र्विप्रं तोषयेत् कटकादिभिः ।
सर्व्वेऽथ कर्म्मिणस्तोष्या[6]स्तस्मिन् काले पृथक् पृथक् ।
क्षमापयीत तान् सर्व्वान् प्रियप्रश्नेन सर्व्वथा ॥
यजमानस्ततो भक्त्या देशिकं परितोषयेत् ।
कांस्यदोहां[7] वस्त्रकण्ठां ताम्रपृष्ठां पयोस्विनीम् ॥
रौप्याङ्घ्रीं स्वर्णश्रृङ्गां तां[8] सुशीलां तरुणीं शुभाम् ।
प्रणम्य विधिना धेनुं दद्याद् वाग्भिः क्षमापयेत् ॥

---

1. संस्थाप्य A संहृत्य B, संस्थाद्य C.
2. तु ताम् A तथा B, C.
3. पादद्वयमिदं B, C पुस्तकयोर्नास्ति ।
4. अत्र A पुस्तके प्रणवादित्वं न दृश्यते B, C पुस्तकयोर्दृश्यते ।
5. प्रमुच्यते B, C. विंमुच्यते A.
6. स्तोष्या A तस्या B, C.
7. कांस्य दोहां A कांस्यदेहां B, C.
8. तां A च B, C.

अवधार्य्यं जगच्छान्तिं नेत्रे चोन्मीलयेद् वुध: ।
चित्रं देवेति मन्त्रेण ज्योतिर्दैवस्य चोत्किरेत् ॥
अग्निज्योतीति मन्त्रेण ज्ञात्वा दृष्टिं प्रकल्पयेत् ॥
दृष्टिभेदांस्तु सकलान् वर्णयिष्ये तवोपरि ।
ततः शुक्लानि पुष्पाणि घृतं सिद्धार्थकं तथा[1] ॥
दूर्व्वां कुशाग्रं देवस्य दद्याच्छिराणि देशिकः ।
पठन् रक्षोहणं सर्व्वंमन्त्र[2]माथर्व्वणं तथा ।
रौप्यं भाजनमादाय मधुरत्रय संयुतम् ॥
मधुवातेति मन्त्रेण मन्त्रयित्वाष्टधा पुनः ।
शलाकया सुवर्णस्य नेत्रे चाभ्यञ्जयेद् गुरुः ॥
हिरण्यगर्भमन्त्रेण इमं मेति[3] च कीर्त्तयन् ।
घृतेनाभ्यञ्ज्ययेत् पश्चात् पठन् घृतवतीं वुधः ॥
मसूरचूर्णेनोद्वर्त्त्य अतो देवे[4]ति कीर्त्तयन् ।
क्षालयेदुष्णतोयेन सप्ततेऽग्नेति देशिकः ॥
चन्दनेनानुलिप्येत द्रुपदादिव इत्यृचा ।
नादेयैः स्नापयेत् तोयै रापो हिष्ठेति देशिकः ॥
स्नापये[5]द् रत्नतोयेन पावमानीभिरेव च ।
समुद्रं गच्छ मन्त्रेण स्नप[6]येच्चन्दनोदकैः ॥
नागकेशर तोयेन····तेत्यभिषेचयेत् ।*
(तीर्थमृत्कलसेनाथ शन्नो देवीति सेचयेत्)

1. घृतसिद्धार्थकमिति क ।
2. सव्वमिति ख ।
3. इमं मे इति चेति ख ।
4. नोदवर्त्तदतो देवेति A उद्वर्त्तय अतो देवेति B, C.
5. स्नपयेत् A स्नापयेत् B, C.
6. स्नपयेत् A स्नापयेत् B, C.
* नागकेशरेत्यादि A पुस्तकीयपादद्वयस्थले B, C पुस्तकयोः तीर्थमृदित्यादि पाददयमस्ति ।

गायत्र्या गन्ध[1]तोयेन पञ्चमृत्तिकया ततः ।
हिरण्यवर्णाः शुचय इति मन्त्रेण सेचयेत् ॥
इयम्मेति च मन्त्रेण स्नप[2]येत् सिकताजलैः । (?)
वल्मीकतोयेन हरिं तद्विष्णोरिति स्नाप[3]येत् ।
या ओषधीति मन्त्रेण स्नानमोषधिमङ्ग[4]लम् ॥
यज्ञाय[5] यज्ञेति मन्त्रेण दद्यात् का[6]षाय पञ्चक[7]म् ।
पयः पृथिव्या मन्त्रेण पञ्चगव्येन सेचयेत् ॥
याः फलिनीरिति हरिं फलतोयेन सेच[8]येत् ।
विश्वतश्चक्षुरित्युक्त्वोत्तरकुम्भेन सेचयेत् ॥*
सोमं राजान इत्येवं पूर्व्वकुम्भेन सेचयेत् ॥
विष्णो विराटमन्त्रेण दक्षिणेनाभिषेचयेत् ।
इषः स्वविरोत्येवं पश्चिमेनाभिषेचयेत् ॥
मूर्द्धानं दिवमन्त्रण कुर्य्यादुद्वर्त्तनं हरेः ।
धात्रीफलं मुरामांसीयुतं शिरसि दापयेत् ॥
मानस्तोकेति मन्त्रेण ततो गन्धोदकैः पुनः ।
गन्धद्वारेति मन्त्रैण ततः स्नानं समाचरेत् ॥
एकाशीति पदन्यस्तैर्घटैर्भलयभूषितः ।
इदमापेति मन्त्रेण सर्व्वैरेवाभिषेचयेत् ॥

---

1. पद्म A गन्व B, C.   2. स्नपयेत् A, B, स्नापयेत् C.
3. स्नापयेत् A, मन्त्रयेत् B, सेवयेत् C.
4. स्नादमोषधिमङ्गलम् A, मङ्गलौषधिवारिणा B, C.
5. यज्ञाय A, B, यज्ञा C.   6. काषाय A, B, कषाय C.
7. पङ्कजम् A, B, पञ्चकम् C.
8. याः इत्यादि पादद्वयं B पूस्तके नास्ति ।

* विद्वतच्चक्षुरिति पादद्वयानन्तवं सोमं रार्ज़न इत्यत आरभ्य इष; स्वविरोत्यकं पश्चिमेनाभिषेचयदित्यन्तं यावत् C पुस्तके वर्त्तते । B पुस्तके च विश्वतच्चक्षुरित्यादिपादद्वय-स्थले इषच्चस्वविर्त्येवं पश्चिमेनाभिषेचयेदिति पादद्वयं दृश्यते । तत्तु A पुस्तके नास्ति ।

आवाहयेत् ततो विष्णुं शुद्धस्फटिकसन्निभम् ।
एह्येहि भगवन् विष्णो लोकानुग्रहकारक ॥
यज्ञभागं गृहाणेमं वासुदेव नमो नमः ।
अनेनावाह्य देवेशं कुर्य्यात् कौतुकमोचनम् ॥
मुञ्चामित्वे[1]ति मन्त्रेण देशिकस्यापि मोचयेत् ।
हिरण्मये[2]ति मन्त्रेण चार्घ्यं देवाय दापयेत् ॥
अतो देवेति सूक्तेन पाद्यं कृष्णाय मन्त्रितम् ।
मधुवातेति मन्त्रेण मधुपर्कं निवेदयेत् ॥
मयि गृह्णा[3]मि (?) मन्त्रेण दद्यादाचमनं बुधः ।
अक्षन्नमीति मन्त्रेण किरेद्दूर्व्वाक्षतं बुधः ॥
निर्मञ्छनं ततः कुर्य्यात् काण्डात् काण्डेति देशिकः ।
गन्धं गन्धवतीत्येव सुन्नयामीति माल्यकम् ॥
इदं वि[4]ष्णिवति मण्त्रेण दद्याद् यज्ञोपवीतकम् ।
वृहस्पतेति मन्त्रेण वस्त्रयुग्मं प्रदापयेत् ॥
वेदाहमेतं पुरुषमुत्तरीयं निवेदयेत् ।
सकलीकरणं कुर्य्यात् पठन्नथ महाव्रतम् ॥
ओँषधयः समम (व ?) दन्तेति पुष्पप्रकिर[6]णं ततः ।
धूरसीति पठन् भक्त्या धूपं दद्यात् स गुल्गु[7]लम् ॥
विभ्राडिति (च) सूक्तेन अञ्ज[8]नन्तु प्रदापयेत् ।
मुञ्च[9]न्तीति मन्त्रेण रोच[10]ना तिलकं तथा ॥

---

1. मुञ्चमि त्विति B, C. मुञ्चामि त्वेति A. 2. हिरण्मयेति A, B, हिरण्मयेन C.
3. मयि गृह्णाति A, B, मयि गृह्णामि B, C.
4. इदं विष्णिवति A, B, इदं विष्णुरिति C. 5. फठन्नुत A, पठन्नथ B, C.
6. A पुस्तके किरणमिति, B, C पुस्तकयोः प्रकरणमिति पाठद्वय विचारेण प्राकिरणमिति साधीयान् पाठः सम्भाव्यते ।
7. गुग्गुलुम् A, गुग्गुलम् B, C. 8. अञ्जनन्तु A, प्रदीपस्तु B, C.
9. दुञ्जन्तीति A, मुञ्चन्तीति B, C. 10. रोचना A, C, रोचनां B.

दद्यात् पुष्पा[1]णि माल्यानि दीर्घायुष्टेति मन्त्रवित् ।
इन्द्रः शुद्धे[2]ति मन्त्रेण श्वेतं छत्रं प्रदापयेत् ॥
आदशंशु विराजेन विकर्णेन तु चामरम् ।
रथन्तरेणाभरणं व्यजनं वायुदैवतैः ।
मुञ्चामीत्विति सूक्तेन पुष्पमालार्च्चनं ततः ॥
ततः स्तुवीत गोविन्दं मन्त्रैर्वेदादिभिर्विभुम् ।
तथा पुरुषसूक्तेन वृहत् साम्ना सुरोत्तमम् ॥
शशिकर्णीति नवभिः सूक्तैः सुरगणार्च्चितम् ।
श्रीयन्ती[3]येन च स्तुयाद् गुह्योपनिषदै(?)स्ततः ॥
सर्व्वमेतत् समं कुर्य्यात् पिण्डिकायामपि द्विज ।
देवस्योत्थान समये सौपर्णं सर्व्वमुच्चरेत् ॥
उत्थिष्ठेति समुत्थाप्य कुर्य्याद् ब्रह्मरथे शुभे ।
शाकुनेन तु सूक्तेन मण्डपे सन्निधापयेत् ॥
पुष्पोपशोभिते स्थाने चन्द्रातपविभूषिते ।
मुक्ताहारै र्लम्बमाने दीपमा[4]लोपशोभिते ॥
भक्ष्यभोज्य रनेकश्च सान्द्र[5]पल्लवशोभिते ।
दिव्यपर्य्यङ्कन्यस्तायां तुलिकायां सुरोत्तम ॥
अतो देवे[6]ति सूक्तेन शय्यायां स्थापयेद्धरिम् ।
तथाविध परे स्थाने पिण्डिकां सन्निवेशयेत् ॥
श्रायन्तीयेन सूक्तेन श्रीसूक्तेन निवेशयेत् । *

---

1. पुष्पाणि A पौष्पाणि B, C.
2. इन्द्रः शुद्धेति A, इन्द्रच्छत्रेति B, C.
3. शान्तातीयेन A, श्रीयन्तीयेन B, C.
4. दीपमालो A, दीपमाल्यो B. C.
5. सान्द्र A, B, पात्र C.
6. अतो देति A अतो देवेति B, C.

* पादद्वयमिदं B पुस्तके नास्ति, A, C पुस्तकयोरस्ति ।

* एतत्पृष्ठस्थः सकलीकरणमित्यादि निवेशयेदित्यन्तोऽंशः ख पुस्तकीयः, क पुस्तके नास्ति ।

सकलीकरणं कुर्य्यात् विष्णोरुरुसि त्रिष्विति ।(?)
दर्शयेच्च ततो भक्त्या हिरण्य(?)मङ्गलाष्टकम् ॥
मृगराजं वृषं नागं व्यजनं कलसं तथा ।
वैजयन्तीं तथा भेरीं दीपमित्यष्टमङ्गलम् ॥
रौप्यजं वा सर्व्वमेतमश्वसूक्तेन दापयेत् ।
उत्थापिधानकं पात्रं(?) सिञ्चिकां दर्व्विकां तथा ॥
मुषलोदुखलेच्चव शिलां सम्मार्ज्जनीं तथा ।
तथा भोजनभाण्डानि गृहोपकरणानि च ॥
पाददेशे तु वै दद्यात् त्रिपादस्येति साधकः ।
यज्ञन इति मन्त्रेण शिरोदेशे निवेश[1]येत् ॥*
निद्रा[2]ख्यं कलसं रत्नगर्भं वस्त्रयुगा[3]न्वितम् ।
खण्डखाद्यरणेकैश्च पूरयित्वा समन्ततः ॥
एष साधारणः प्रोक्तः स्वपनस्य विधिर्मया ।
य एवं[4] विधिवत् कुर्य्यात् तस्य पुण्यफलं शृणु ॥
यावन्ति जलविन्दूनि मद्गात्रे विनिवेशयेत् ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥
इति हयशीर्ष पञ्चरात्र स्न(ा)पन पटलम् ॥३६॥

---

1. निवेशयेत् B, निवेदयेत् C. 2. निद्राख्यं A, मित्राख्यं B, C.
3. वस्त्रयुगान्वितमित्यत्र कुशान्वितमिति A पुस्तके दृश्यते ततश्च छन्दोभङ्ग स्यात् ॥
4. एनं A, एवं B, C.

सप्तत्रिंश पटलम्

भगवानुवाच।

अतःपरं प्रवक्ष्यामि अधिवासननिर्णयम् ।
येन वै कृतमात्रण सान्निध्यं मम जायते ॥१॥
सर्व्वज्ञं सर्व्वगं ध्यात्वा आत्मानं पुरुषोत्तमम् ।
ॐकारेण समायोज्य चिच्छक्तिमभिमानिनीम् ॥२॥
निःसार्य्यात्मैकतां कृत्वा त[1]स्मिन् गर्भग[2]ते विभौ ।
शोषयेन्मरुतो पृथ्वीं वह्निवीजेन दीपयेत् ॥३॥
संहरेद् वायुना चाग्निं वायुमाकाशतां नयेत् ।
अधिभूताधिदवस्तु साध्या[3]त्मै (?) विंषयै सह ॥४॥
तन्मात्रमात्रकं कृत्वा संहरेत् तान् क्रमाद् वुधः ।
आकाशं मनसाहृ(कृ)त्य मनोऽहङ्क(ा?)रणे कुरु ॥५॥
अहङ्कारञ्च महति तञ्चाप्यव्याकृतं नयेत् ।
शान्तेऽनन्ते निष्प्रपञ्चे निर्मलं ज्ञानविग्रहम् ॥६॥
ध्यायेत्तत् परान[4]न्दे शुद्धे वुद्धऽमलेऽव्यये ।
लीनमव्याकृतं यत्र तत्संस्थं यत्स्वरूपकम् ॥७॥
परमं ब्रह्मणः शक्तिं (?) तं विद्धि परमेष्ठिनम् ।
वासुदेवः स विज्ञेयो ज्ञानदेहो मनीषिभिः ॥८॥
स तामब्याकृ (हृ?)[5]तिं मायामवष्टभ्य सिसृक्षया ।
शब्दात् स्व(ा?)मू[6]र्त्तिमसृजत् स्पर्शाख्यां पौरुषीं ततः ॥९॥

---

1. तस्मिन् A अस्मिन् B, C. । 2. गर्भगते A, सर्व्वगते B, C.
3. साध्यात्मे A साध्यात्मैः B, C.
4. ततृतत् परानन्दे A तत्परमानन्दे B, C.
5. अव्याकृतिं A अव्याकतिः B, C.
6. शब्दात् स्वमूर्त्तिम A, शब्दातममूर्त्तिम B, C.

संकर्षणः स विज्ञेयः सर्व्वलोकमहेश्वरः ।
स तु संकर्षणः क्षोभ्य मायाम[1]व्याकृतिं स्वयम् ॥१०॥
सर्व्वतेजोमयं रूपं प्रद्यु[2]म्नं सोऽसृजत् प्रभुः ।
प्रद्यु[3]म्नं स सिसृक्ष[4]न् वै रसमात्रासु संसृजेत् ॥११॥
अनिरुद्धं महाबाहुमंकमर्नानंवेश्वरम् (?) ।
सोऽसृजद् गन्धतन्मात्राद्देवदेवं चतुर्मुखम् ॥१२॥
शक्तयः पञ्च विख्याता देवस्य परमात्मनः ।
अधिभूताधिदे(?)वस्य अध्यात्मस्य च कारणम् ॥१३॥
एतास्तन्मात्रशब्देन कीर्त्तिताः मुनिभिः सदा ।
देवः सर्व्वात्मको ब्रह्मा सिसृक्षुर्विविधाः प्रजाः ॥१४॥
तोयं ससर्ज भगवान् तस्मिन्नण्डमथासृजत् ।
पञ्चभूतात्मकं भूतं शुभं दिव्यं हिरण्मयम् ॥१५॥
तस्मिन् संक्रमते जीवशक्तिरात्मोपसंहृ[5]ता ।
पञ्चतन्मात्रकाधारा संहृताखिलवृत्तिकी (?) ॥१६॥
प्राणो जीवेन संयुक्तो वृत्तिमानिति शब्द्यते ।
जीवो व्याकृतसंज्ञस्तु प्राणस्त्वाध्यात्मिकः स्मृतः ॥१७॥
प्राणैर्युक्ता ततो बुद्धिः संजाता चाष्टवृ[6]त्तिकी ।
अहङ्कृतिस्ततो जज्ञे म(ा?)नस्तस्मादजायत ॥१८॥
अर्था[7]ः प्रजज्ञिरे पञ्च संकल्पादियुतास्ततः ।
शब्दः स्पर्शश्च रूपञ्च रसो गन्ध इति स्मृतः ॥१९॥

---

1. क्षेमं मायया A क्षोभ्य मायां B, C.
2. प्रद्युम्नं A, C. प्रयुक्तं B.
3. प्रद्युम्नं A, C. प्रद्युम्नः B.
4. सिसृक्षन् वै A, B, सिसृक्षु र्वै C.
5. शक्तिरात्मोपसंहृता A, B, शक्तिवाय्वोपसंस्कृता C.
6. वृत्तिकी A, C. वृत्तिका B.
7. अर्थाः A, B, अन्नाः C.

ज्ञानशक्तियुतान्ये[1]तैरारब्जानीन्द्रियाणि तु ।
त्वक्श्रोत्रघ्राणचक्षूंषि जिह्वा बुद्धिन्द्रियाणि तु ॥२०॥
पादं पा[2]युस्तथा पाणी वाग् उपस्थस्तु पञ्चमः ।
कर्म्मेन्द्रियाणि चैतानि पञ्चभूतान्यतः शृणु ॥२१॥
आकाशवायुतेजांसि सलिलं पृथिवी तथा ।
स्थूलमेभिः शरीरस्तु सर्व्वाधारं प्रजायते ॥२२॥
एतेषां वाचका मन्त्राः प्रोच्यन्ते साम्प्रतं स्फुटम् ।
जीवतत्त्वं मकारन्तु देहस्य व्यापकं न्यय्येत् ॥२३॥
प्राणतत्त्वं भकारन्तु जीवयो[3]नि गतं न्यसेत् ।
हृदयस्थं बकारन्तु बुद्धितत्त्वं न्यसेद् बुधः ॥२४॥
फकारमपि तत्रैवमहङ्कारमपि न्यसेत् ।
मनस्तत्त्वं पकारन्तु न्यसेत् सङ्कल्पसम्भवम् ॥२५॥
शब्दतन्मात्रतत्त्वन्तु नकारं मस्तके न्यसेत् ।
स्पर्शात्मकं धकारन्तु वक्त्रदेशे तु विन्यसेत् ॥२६॥
दकारं रूपतत्त्वन्तु हृद्देशे विनियोजयेत् ।
थकारं वस्तिदेशे तु रसतन्मात्रकं न्यसेत् ॥२७॥
तकारं गन्धतन्मात्रं जङ्घायां विनियोजयेत् ।
णकारं श्रोत्रयोर्न्यस्य ढकारं विन्यसेत् त्वचि ॥२८॥
डकारं नेत्रयुग्मे तु रसनायां ठकारकम् ।
टकारं नासिकायान्तु ञकारं वाचि विन्यसेत् ॥२९॥
झकारं करयोर्न्यस्य जकारं पादयोर्न्यसेत् ।
छकारं पायुदेशे तु चकारं चाप्युपस्थके ॥३०॥
विन्यसेत् पृथिवीभा[4]वं ङकारं पादयुग्मके ।*
नाभौ घकारमप्तत्त्वं[5] तैजसं गं हृदि न्यसेत् ॥३१॥

---

1. न्येतै A. B. न्येभि C. 2. पादं पायुः A, B, पादपद्म C.
3. जीवयोनि A जीवोपरि B, C. 4. पृथिवीभावं A, B. पृथिवीतत्त्वं C.
* भकारमित्यतः....युग्मके इत्यन्तं पादषट्कं B, C पुस्तकयोर्विद्यते । A पुस्तके तु प्रमादात् तत् पतितम् ॥ 5. अप्तत्त्वं A, तत्रवस्तु B, C.

खकारं वायुतत्त्वन्तु नासिकायां निवेशयेत् ॥
ककारं विन्यसेन्नित्यं खतत्त्वं मस्तके बुधः ॥३२॥
हृत्पुण्डरीके संन्यस्य गकारं सूर्य्यदैवतम् ।
कलाद्वादशसंयुक्तं न्यसेत्तत्र विचक्षणः ॥३३॥
द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः ।
कलाषोड़शसंयुक्तं सकारं तत्र चिन्तये[1]त् ॥३४॥
तन्मध्यें चिन्तयेन्मन्त्री बिन्दुं[2] वह्निस्तु मंडलम् ।
हकारं विन्यसेत् तत्र कलाभिर्दशभिर्युतम् ।
षका[3]रं विन्यसेत् पश्चात् प्रणवेन सुरोत्तम ॥३५
शकारश्च यकारश्च रेफोलश्च व एव[4]च ।
आकारेण समायुक्ता नमस्कारान्त योजिताः[5] ॥३६
प्रथमोङ्कारसंयुक्ता न्यसनीया सुरोत्तम ।
परमेष्ठी पौरुषी च निर्वृति[6] विंश्वसंज्ञिताः ॥३७
सर्व्वात्मशक्तिरित्येताः कीर्त्तिताः पञ्चशक्तयः ।
स्थाने (?) तु प्रथमा प्रोक्ता द्वितीया आसने मता ॥३८
तृतीया शयने तद्वच्चतुर्थी यान[7]कर्म्मणि ।
प्रत्यर्च्चायां पञ्चमी तु प्रयोक्तव्या विजानता ॥३९
क्षकारं विन्यसेन्मध्ये सर्व्वतेजोमयं शुभम् ।
ततो विचिन्तयेद्देवं परमात्मानमीश्वरम् ॥४०
पौरुषस्थं स्वभाव[8]स्थं सर्व्वविज्ञानविग्रहम् ।
शान्तिसंभृ(भू[9])ति कर्त्तारं चिन्तयेद्देशिकोत्तमः ॥४१

---

1. चिन्तयेत् A, विन्यसेत् B, C,
2. बिन्दुं A, वायुं B, C,
3. षकारं A, B, सोङ्कारं B, C.
4. व एव च A, तथेव च B, C.
5. योजिताः A संयुता B, C.
6. निवृतिः A, निवृत्तिः B, C.
7. यान A, पान B, C.
8. शुभावस्थं B, C. स्वभावस्थं A.
9. शान्तिसंभृति A, B, शान्तं सद्भूति C.

एवं सूक्ष्म[1]तमं देवं ज्ञानरूपं सुरेस्वरम् ।
वाच्य-वाचक-भावेन स्थितं व्याप्प स्वशक्ति[2]भिः ।।४२
मन्त्रमूर्त्तिं ततस्तस्य ध्यात्वा कुर्यात्तु देशिकः ।
या मूर्त्तिर्देशिकेनेह प्रारब्धा तु प्रतिष्ठिता ।।४३
तस्यास्तु मूलमण्त्रेण मन्त्रन्यासं समाचरत् ।
आदिमूर्त्तेस्तु वक्ष्यामि सकलीकरणं शृणु ।
स्वविग्रहे तथाच्चार्यां यत्कार्य्यं देशिकोत्तमैः ।।४४
ओँ नमो भगवते वासुदेवायेति मूलमन्त्रः ।।४५
ओँकारं शिरसि न्यस्य नकारं प्राणगोचरे ।
मोकारन्तु ललाटस्थं भकारं मुखमध्यतः ।।४६
कण्ठदेशे गकारन्तु वकारं हृदये तथा ।
तेकारं दक्षिणभुजे वाकारं वामगोचरे ।।४७
सुकारं वामजङ्घायां देकारं दक्षिणे स्थितम् ।
वामपादेतु वाकारं यकारं दक्षिणे न्यसेत् ।।४८
ओँकारं चिन्तयेत् प्राज्ञः स्फुरज्ज्वालावलीधरम् ।
नकारं स्फटिकाभासं मोकारं चेन्द्रनी[3]लवत् ।।४९
तेजोनिभं भकारन्तु गकारं काञ्चनप्रभम् ।
वकारं पद्मपत्राभं तेकारं स्वर्णसुप्रभ[4]म् ।।५०
वाकारं कुन्दसदृशं सुकारं विद्युत्सप्र[5]भम् ।
देकारं कर्णिकाराभं वाकारं हिमसन्नि[6]भम् ।।५१
पद्मरागसमाभासं यकारस्तु विचिन्तयेत् ।
केशवं शिरसि न्यस्य वक्त्रे नारायणं प्रभुम् ।।५२

---

1. सूक्ष्मतमं A, सुक्ष ? जित्वं (?) B, C.
2. स्वशक्तिभिः A, स्वशक्तितः B, C.
3. चेन्द्रनीलवत् B, C. चन्द्रनीलवत् A.
4. सप्रभम् A, सुप्रभम् B, C.
5. विद्युत्सप्रभम् A, विद्युतप्रभम् B, C.
6. हिम सन्निभम् B, C. हि समन्वितम् A (?)

ग्रीवायां माधवं देवं गोविन्दं भुजयुग्मके ।
हृदये विन्यसेद् विष्णुं पृष्ठे तु मधुसूदनम् ॥५३
जठरे वामनं देवं कटिदेशे तु विक्रमम् ।
श्रीधरं वामजङ्घायां हृषीकेशं तथान्यत:[1] ॥५४
गुल्फदेशे पद्मनाभं पादे दामोदरं प्रभुम् ।
हृदयादिषड़ङ्गञ्च यथायोगं[2] विन्यसेत् ।
एतत् साधारणं प्रोक्तमादिमूर्त्तेस्तु सत्तम ॥५५
अथवा यस्य देवस्य प्रथमे स्थापनं भवेत्[3] ।
तस्यैव मूलमन्त्रेण सजीवकरणं भवेत् ॥५६
यस्या मूर्त्तेस्तु यन्नाम तस्याद्यञ्चाक्षरञ्च[4] यत ।
तं (?) स्वरै द्वादशै (?) र्भेद्य दीर्घाण्यङ्गानि कल्पयेत्[5] ।
हृदयादीनि देवेश मूलञ्च दशमं कुरु ॥५७
यथा देहे तथा देवे[6] तत्त्वानि विनियोजयेत् ।
ततो गन्धैश्च पुष्पैश्च नैवेद्यैर्विविधैरपि ॥
लड्डुकैर्वटकैः पूपै घृतपूवैः सफालितैः ॥(?)
कृषरैः पायसैर्भक्तैर्नैवेद्यै[7]र्दर्शयेद्धरिम् ॥५८
विविधैश्चाप्यङ्कारै हैम[8]पुष्पैः समुज्ज्वलैः ।
प्रवालरत्नाभरणै हेमैः पद्मैः समुज्ज्वलैः ॥५९
प्रभूतैर्याज्ञिकैर्द्रव्यैर्देयं[9] चक्राब्जमण्डले ।
यजेतो भक्तितो विष्णुं भोगमोक्षफलप्रदम् ॥६०

---

1. तथान्यत: A, तु वामत: (?) B, C, 2. च A, तु B, C.
3. भवेत् A चरेत् B, C.
4. ञ्चाक्षरञ्च A अक्षरञ्च B, C.
5. दीर्घाण्यङ्गाणि कल्पयेत् A, C. दीर्घाणि परिकल्पयेत् B.
6. देहे तथा देवे A देवे तथा देहे B, C.
7. नैवेद्यैः A नैवेद्यम् B, C.
8. हेम A गन्ध B, C.
9. र्दे.....A र्देयं C.

चन्दनागुरुकर्पूरै र्मृगदर्पैं ससर्ज्जकैः ।
दद्यात् पञ्चविधं धूपं पुष्पं नानाविधं शुभम् ।।६१
समन्ताद्दीपमालाभिः शोभयेद्देवसत्तम ।
पूर्व्ववच्चासनं ध्यायेत् सगात्रं सपरिच्छदम् ।।६२
शुभं पत्रं द्वादशारमुपरिष्टाद्विचिन्तयेत् ।
त्रिनाभिचक्रं द्विर्नेमिं[1] सूक्ष्मं[2] तत्त्वसमन्वितम् ।।
प्रधिदेशे ततः प्राज्ञः प्रकृत्यादीन् निवेशयेत्[3] ।।६३
पूजयेदारकाग्रेषु सूर्य्यं द्वादशधा पुनः[4] ।।
कलाषोड़शसंयुक्तं सोमं तत्र विचिन्तयेत् ।।
दहनत्रितयं[5] नाभौ चिन्तयेद्देशिकोत्तमः ।
पद्मञ्च द्वादशदलमक्षमध्ये विचिन्तयेत् ।। ६५
तन्मध्ये पौरुषीं शक्तिं ध्यात्वाभ्यर्च्च्य तु देशिकः ।
प्रतिमायान्तु योन्यस्त स्तत्र तं पूजयेत् सुधीः ।।
गन्धपुष्पादिभिः सम्यक् साङ्गं साधारणं क्रमात् ।
द्वादशाक्षरबीजै[6]स्तु केशवादीन् समर्च्चयेत् ।।
आरकेष्वनुपूर्व्वेण द्वादशारे तु[7] मण्डले ।
पश्चाद् यथोक्तविधिना लोकपालान्त[8]रं क्रमात् ।।
प्रतिमामर्च्चयेत् पश्चात् गन्धपुष्पादिभिर्द्विजः ।
पौरुषेण च* सूक्तेन प्रत्यृचं सुरसत्तम् ।।
श्रि[9]याः सूक्तेनार्च्चयीत प्रत्यृचं पिण्डिकामयम् ।
जननादिक्रमात् पश्चात् जनयेद् वैष्णवानलम् ।। ७०

---

1. चक्रद्विर्नेमि A, B चक्रं द्विर्नेमिं C.
2. सूक्ष्मं A, B अक्षं C.
3. निवेशयेत् A, C. विचिन्तयेत् B.
4. पुनः A बुधः B, C.
5. त्रितयं A, B, त्रितये C.
6. बीजैस्तु A, B, बीजस्तु C.
7. द्वादशारे तु B, C. द्वादशाक्षर A.
8. अन्तरं A, आदिकं B, C,

* च B, C, तु A.

9. A पुस्तके निर्विसर्गान्तः पाठः ।

तत् क्रमं वर्णयिष्यामि दीक्षा[1]पाते सुरोत्तम ।
कृत्वाग्निं वैष्णवैर्मन्त्रैः कुर्य्याच्छान्त्युदकं बुध[2]ः ।।
तत् सिद्धा (?) प्रतिमा मूर्द्धि वह्निप्रणयनं कुरु ।
दक्षिणेऽग्निं द्रुतमिति कुण्डेऽग्निं प्रणयेद्बुधः ।।
अग्निमीड़ेति पूर्व्वे तु कुण्डेऽग्निं प्रणयेद्बुधः ।।
उत्तरे प्रणयेदग्नि मग्निमग्निस्तु धीमहि ।
अग्निप्रणयने मन्त्रस्त्वमग्नेऽस्त्विवति पश्चिमे ।।
पलाशसमिधानान्तु घृताक्तानां महालये ।
अष्टोत्तरसहस्रन्तु कुण्डे कुण्डे च होमयेत् ।।
वेदादिमन्त्रैर्देवेश[3] ततो व्रीहींस्तु होमयेत् ।।
तिलानां घृतयुक्तानां कुण्डे कुण्डे तु मूर्त्तिपाः ।
सहस्रैकं व्याद्धतिभिर्जुहुयुः साज्यमक्षतम् ।।
मूलमन्त्रेण जुहुयुः स्वाहान्तेन सुरोत्तम ।।
अष्टोत्तरसहस्रन्तु कुण्डे कुण्डे यथाविधि ।।
घृतहोममिदं प्रोक्तं शान्तिहोममतः शृणु ।
मधुरत्रितयेनाथ जुहुयाद् द्वादशाक्षरैः ।।
पादौ नाभिं हृच्छिरश्च स्पृशेद्धुत्वा यथाक्रमम् ।
घृतं दधिपयश्चैव माक्षिकं देशिको[4]त्तमः ।।
प्रतिलोमं विशे[5]च्चापि हुत्वा तु मधुरत्रयम् ।
शतमष्टोत्तरं हुत्वा विष्णुं शिरसि संस्पृशेत् ।
तथैव हुत्वा पञ्चाशद् हृदये संस्पृशेद्धरिम् ।
ततोऽष्टाविंशतिं हु[6]त्वा नाभिदेशे हरिं स्पृशेत् ।।
अष्टावष्टौ ततो हुत्वा पादाङ्गुष्ठौ च[7] संस्पृशेत् ।
यागमण्डपमासाद्य दक्षिणद्वार[8]गोचरे ।।

---

1. दीक्षापाते सुरोत्तम A दीक्षायां पुरुषोत्तम B, C.
2. बुधः A, पुनः B, C.
3. देवेश A देवेशं B, C.
4. देशिकोत्तमः A, B, देशिकः स्वयम् C.
5. विशेच्चापि A स्पृशेद्वापि B, C.
6. तिं हुत्वा A, B, ति हुंत्वा C.
7. च A, तु B, C.
8. दक्षिणद्वार A, दक्षिणे धन B, C.

उत्तराभिमुखाः स्थाप्याश्चत्वारो धेनवोऽनघ ।
गङ्गेति प्रथमा ख्याता द्वितीया यमुनेति च ।।
गोदावरी तृतीया च चतुर्थी तु सरस्वती ।
दोहनं विष्णुगायत्र्या कृत्वा पश्चाच्चरुं श्रपेत् ।।
गायत्र्या होमयेच्चैव गायत्र्यैव बलिं हरेत् ।
भोजयेद्ब्राह्मणांश्चैव मण्डपादुत्तरे द्विज[1] ।।
पायसेनाज्ययुक्तेन शर्करामिश्रितेन च ।।
मासाधिपानां तुष्ट्यर्थं दद्यात् कनकदक्षिणाम् ।।
गाश्च तांस्तान् समुद्दिश्य एकैकाय निवेदयेत् ।
देवासुरादीनुद्दिश्य कुर्य्याद् बलिनिवेदनम् ।।
अधिवास्यैव देवेशं कुर्य्याज्जागरमादरात् ।
मङ्गलै ब्रह्मघोषैश्चजयशब्दवरैस्तथा ।
पुण्याहशब्दैर्विपुलैर्गीतवादिशब्दनिःस्वनैः ।।
शङ्खघोषेण महता वीणावेणुरवेण च ।
कोलाहलैश्च भेर्य्याद्यैः कुर्य्याज्जागरणं हरेः ।।
यस्त्वेवं विधिना भक्त्या कुर्य्याद्देवाधिवासनम् ।
स सर्व्वतीर्थयज्ञानां दानानां तपसां तथा ।।
फलं शतगुणं प्राप्य विष्णुलोके महीयते ।
आभूतसंप्लवं यावद्देववत् तत्र मोदते ।।

इति हयशीर्षे पञ्चरात्रे अधिवासपटलम् ।।३७।।

---

1. द्विज A द्विजः B, C.

अष्टत्रिंश पटलम्

भगवानुवाच

अधिवा[1]स्य विधानेन देवदेवं हरिं प्रभुम् ।
पिण्डिकास्थापनार्थाय गर्भागारं विशेद् गुरुः ॥
वृत्तं वा चतुरस्रं वा आयतं चतुरस्रकम् ।
वृत्तायतन्तु प्रासादं चतुर्विधमुदाहृतम् ॥
चतुरस्रायते गर्भे त[2]था वृत्तायते द्विजः ॥
स्थापयित्वा विधानेन सर्व्वलोकपितामह (:) ?) ॥
निविष्टं यानगं वापि वृत्ते संस्थापयेद्बुधः ॥
चतुरस्रे स्थापयीत सिं[3]हं साधारणं हि तत् ।
स्थानासनं तथा यानं चतुरस्रे सवृ[4]त्तके ॥
आयते शयनं कार्य्यं न स्थानं नासनं तथा ।
यादृशं गर्भदे[5]हस्तु (?) कृतं सुरगणार्[6]च्चित ॥
संवि[7]भज्य प्रकुर्व्वीत सप्तभागं विचक्षणः ।
पुनश्च सप्तधा कृत्वा स्थानभागं प्रकल्पयेत् ॥
ब्रह्मभागं भवेन्म[8]ध्यं दैवं स्यात्तदनन्तरम् ।
तृतीयं मानुषं भागं पैशाचञ्च चतुर्थकम् ॥
द्विभुजं ध्यानयोगस्थं निविष्टं स्थितमेव च[9] ।
चतुर्भुजं ब्राह्मणे तु[10] भागे संस्थापयेद्धरिम् ॥

---

1. अधिवास A अधिवास्य B, C.
2. तोद्....यथा A, B, ते गर्भे तथा C.
3. सिंहं A, स्थितं B, C.
4. सवृत्त के A, सुवृत्त के B, C.
5. देहस्तु A, गेहन्तु B, C.
6. र्च्चित A, C, र्च्चितः C.
7. संविभज्य A, तं विभज्य B C.
8. भवेन्मध्यं A, B, भवेदेवं C.
9. च A, वा B, C.
10. ब्राह्मणेतु A, वा ब्राह्मे तु B, C.

व्यक्ताव्यक्तं तथा व्यक्तं लिङ्गं ब्राह्म तथा न्यसेत् ।
स्वमूर्त्तिं ब्रह्मभागेतु व्योमं वा अ - - - - * ॥
ब्रह्मभागं परित्यज्य किञ्चिदाश्रित्य वा द्विज ।
सदैव स्थापयेद्देवं देवमानुषभागयोः ॥
दै[1]वमानुषभागाभ्यां शयनं परिकल्पयेत् ॥
दारवीं मृन्मयीं मूर्त्तिं देव[2]स्थाने निवेशयेत् ॥
मानुषं किञ्चिदाश्रित्य आसीनं स्थापयेद्धरिम् ।
नरसिंहं वराहञ्च दे[3]वभागे नियोजयेत् ॥
विघ्नेशमम्बिकां देवीं मातृभू त[4]गणं तथा ।
आदित्यादीन् हरेद् रत्ना[5]न् एवमादींस्तथापरान् ॥
पैशाचे स्थापयेत् स्थाने नात्र कार्य्या विचारणा ।
स्वस्थान वर्ज्जिताः सर्व्वे भयदुःखामयप्रदाः ॥
तस्मात् सर्व्वप्रय[6]त्नेन स्वे [7]स्वे स्थाने नियो[8]जयेत् ।
सर्व्वसाधारणं वक्ष्ये पिण्डिका स्थापनं तव ॥
दैवमानुषभागा[9]भ्यां स्थाप्या यत्नाद्धिपिण्डिका ॥
नपुंसकशिलायान्तु रत्नन्यासं समारभेत् ॥
वस्त्राभरणगन्धाद्यैः पूर्व्ववद्भूषितो गुरुः[10] ।
हुत्वाहुतिशतं विप्र नारसिंहेण वा [10]पुनः ॥
तेनैवामन्त्र्य रत्नादीन् पिण्डिका शु[11]भ्रके न्यसेत् ।

---

* A, B पुस्तकयोः व्योममित्यनन्तरं पतितम् । C पुस्तके व्योमं वा अ........ इत्यनन्तरं पतितं दृश्यते । व्यक्तेत्यादि पादचतुष्टय क पुस्तके नास्ति ॥

1. दैव A, B, देव C ।
2. देवस्थाने A, दिव्यस्थाने B, C.
3. देव A, दैव B, C.
4. मातृर्भूत A, B. मातृभूत C,
5. A पुस्तके नास्ति । B, C पुस्तकयोः हरेद् रत्नानिति पाठः ।
6. सर्व्वप्रयत्नेन B, C । सर्व्वेण यत्नेन A ।
7. स्वे स्वे A, स्व B, C.
8. नियोजयेत् A, विनियोजयेत् B, C.
9. भागाभ्यां A, B, भागाद्या C.
10. भूषितो गुरुः A, B भूषिते तव C ।
11. श्वभ्रके A, B, शुभ्रके C ।

वृत्तायते च प्रासादे यत्र तत्र च कारयेत् ।
गुग्गुलुं द्रावयित्वा तु गर्भे तु[1] विनिवेशयेत् ।।
रत्नादीनान्तु क्षिप्तानां निश्चलीकरणाय तु ।
ततो निवेशयेत्तांस्तु दिशासु विदिशासु च ।।
प्रथमावरणे व्रीहीन् रत्नान्यपि द्वितीयके ।
तृतीये विन्यसेद्धातून् लोहञ्चापि चतुर्थके ।।
प्रतिवारणगर्भेतु[2] पञ्चमावरणे द्विजः ।।
चन्दनादींस्तु विप्रेन्द्र चा[3]ष्टौ दिक्षु निवेशयेत् ।।
एकैकं दिक्षु विन्यस्य मध्ये चैवापरं न्य[4]सेत् ।
ऐन्द्र्याञ्च चन्दनं न्यस्य आग्नेय्यां रक्तचन्दनम् ।।
कृष्णागुरुं दक्षिणस्यां नैऋत्यामपरागु[5]रुम् ।
उशीरं पञ्चमे भागे विष्णुक्रा[6]न्तामथापरे ।।
सहदेवामुदीच्यान्तु लक्षणामीशगोचर ।
ब्राह्मीं सुवर्च्चला[7]( ) मध्ये वृद्धिं ब्राह्मे निवेश[8]येत् ।।
धान्य मैन्द्रयां निवेश्याथ आग्नेय्यां विन्यसेत्तथा ।
य[9]वान् दक्षिणभागेतु गोधूमं नैर्ऋते न्यसेत् ।।
तिलांस्तु पश्चिमे[10]भागे नीवारं वायुगोचरे ।
मुद्गमुत्तरतो दद्यात् निष्पावानीशगोचरे ।।
मध्ये सिद्धार्थकं दद्याद् रत्नन्यासं शृणुष्व मे[11] ।

---

1. तु A षु B, C ।
2. तु A षु B, C.
3. श्चाष्टौ A, B चाष्टौ C.
4. वापरे न्यसेत् A, B, वापरं न्यसेत् C.
5. अपरागुरुम् A, दर्भमुत्तमम् B, C.
6. क्रान्ता B, C क्रान्त A.
7. सुवर्च्चला A, B, सुवर्च्चलां C.
8. निवेशयेत् A, B, निवेदयेत् C.
9. यवान् A, B यवं C.
10. भागे A दद्यात् B. C.
11. शृणुष्व मे B, C. समाचरेत् A.

वज्रं तु[1] पूर्व्वतो दद्यादाग्नेय्यां मौक्तिकं न्यसे[2]त् ।
वैदूर्य्यं दक्षिणे दद्यात् शङ्खं निर्ऋतिगोचरे ॥
स्फटिकं वारुणे दद्यात् पद्मरागन्तु वायवे ।
उत्तरे चन्द्रकान्तन्तु ऐशान्यामिन्द्रनीलकम् ॥
पद्मरागं न्यसेन्मध्ये यथावद्द्विजसत्तम ॥
हरितालं न्यसेत् पूर्व्वे आग्नेय्यान्तु मनःशिलाम् ।
अञ्जनं दक्षिणे दद्यात् माक्षिकं ब्रह्मगोचरे ॥
सौराष्ट्री वारुणे देया वायव्यां गैरिकं तथा ।
कांस्यं चैवोत्तरे दद्यादैशान्यां गन्धकं तथा ।
पारदं तु न्यसेन्मध्ये यथा वा त्रिदशेश्वर ।
हिरण्यं पूर्व्वतो दद्यादाग्नेय्यां तारमुत्तमम् ॥
आयसं दक्षिणे न्यस्य आग्नेय्यां[3] त्रपु[4]कं तथा ।
पश्चिमे विन्यसेद् व्योषं[5] नारं (?) वायव्यगोचरे ॥
सि[6]ह्लकं चोत्तरेन्यस्य शुल्वमीशानगोचरे ।
पद्मं कुर्म्मं तथा श[7]ङ्खं पृथ्वीं मध्ये निवेशयेत् ॥
सुमेरुञ्च सुरश्रेष्ठ सर्व्वमेतद्धिरण्मयम् ।
एषामेकतमं मध्ये न्यसेत् सर्व्वाण्यथापि वा[8] ॥
नमो हिरण्यमन्त्रेण ब्रह्मस्थाने निवेशयेत् ॥
नराणां मूर्त्तिमन्त्राणां मन्त्रैरेतन्निवेशयेत् ॥
पुण्डरीकाक्षमन्त्रेण गायत्र्या वा निवेशयेत् ॥
अथवा मूलमन्त्रेण मन्त्रेणाष्टाक्षरेण वा ।
दिगीशानां तु[9] मन्त्रेण रत्नादीन् विनिवेशयेत् ॥

---

1. तु A च B, C.
2. तथा A न्यसेत् B, C.
3. आग्नेय्यां A, B, नैर्ऋत्यां C.
4. त्रपुकं A, C त्रपुषं B,
5. व्योषं A, B, नारं C.
6. सीसकं B, C सिह्लकं A.
7. शङ्खं B, C सूक्ष्मं A.
8. वा A, च B, C.
9. दिगीशानं तु A, दिगीशानान्तु B, दिगीशानान्त C.

तद् यथा—

*शक्रः सुरपतिः श्रीमान् सहस्रनयनोज्ज्वलः ।
यष्टा यः क्रतुमुख्यानां नमस्तस्मै महात्मने ॥
ओँ त्रातारमिति मन्त्रेण सान्निध्यं त[1]त्र कारयेत् ॥१॥ - 39
अज[2]पृष्ठगतः शक्तिर्यस्य हस्ते महात्मनः ॥
हव्यकव्यवहो यो वै नमस्तस्मै महात्मने ॥
ओँ .ग्न आयाहि मन्त्रेण सान्निध्यं तत्रकारयेत् ॥२॥ - 40
ओँ कृष्णाञ्जननिभो रौद्रो दण्डपाणिः स्रगुज्ज्वलः ॥
स[3]र्व्वप्रेताधिपो देवो नमस्तस्मै महात्मने ॥
सान्निध्यकर[4]णे तस्य मन्त्रस्त्वसि य : स्मृतः ॥३॥ - 41
ओँ घोरदंष्ट्राकरालस्तु खड्गपाणिः सुभैर[5]वः ॥
राक्षसाधिपतिर्देवो नमस्तस्मै महात्मने ।
सान्निध्यार्[6]थं तस्य मन्त्र एष ते निर्ऋते स्मृतः ॥४॥ - 42
सप्तसागरदेहस्तु पाशपाणिर्महाद्युतिः ।
यादसां पतिरेको यो[7] नमस्तस्मै महात्मन ॥
तस्यावा[8]हनमन्त्र[9]स्तु पञ्चनद्यः सरस्वती ॥५॥ — 43
सप्तस्वरानुगा यस्य योऽनुगी[10]तो मनीषिभिः ।
अशरीरेति विख्यातो नमस्तस्मै महात्मने ॥
मन्त्रस्तस्यापि सान्नि[11]ध्ये वात आवातु भेषजम् ॥६॥ - 44

---

* शक्र इत्यस्यादौ ओँमित्यधिकं वर्त्तते ।
1. तत्र A, B, तस्य C.
2. अज A, अजा B, C.
3. सर्व्व B, C सर्प A.
4. सान्निध्यकरणे A, सान्निध्यमगमत् B, C.
5. सुभैरव A, सुरेश्वर B, C.
6. मूलोक्तपाठः A ग्रन्थधृतः । सान्निध्यकरणे मन्त्रः B, C.
7. यो B, C, वा A.
8. स्यावाहन B, C, स्यालभन A.
9. मन्त्रस्तु A, B मन्वञ्च C.
10. अनुगीतो B, C. निगीतो A.
11. सान्निध्ये A, B, सान्निध्यं C.

धनाधिपो ह्रस्वमूर्त्तिर्गदाहस्ते नृवाहनः ।
उत्तराशाधिपः श्रीमान् नमस्तस्मै महात्मने ।।
सोमो राजेति यन्त्रोऽयं तस्य सान्निध्यकारकः ।।७।।
विद्याधिपो वृषारूढ़ः शूलपाणिर्महाबलः ।
त्रैलोक्यवन्दितः श्रीमान् नमस्तस्मै महात्मने ।।
ईशावास्येति मन्त्रेण तत्सान्निध्यं प्रकल्प[1]येत् ।।८।।
य ईमां सकलां पृथ्वीं सप्तसागरभूषिताम् ।
विभर्त्ति नाना[2] प्रतिमां नमस्तस्मै महात्मने ।।
नमोऽस्तु सर्पमन्त्रेण सान्निध्यं तस्य कल्प[3]येत् ।।९।।
ओँ ब्रह्मा चतुर्मुखः स्वामी सर्व्वलोकपितामहः ।
कमण्डलुधरः श्रीमान् तस्मै नित्यं नमोनमः[4] ।।
ब्रह्मा देवेति मन्त्रेण सान्निध्यं तस्य कल्पये[5]त् ।।१०।।
म[6]न्त्रन्यासमिमं कृत्वा गायत्र्यालभनं स्मृतम् ।
छादयेन्नेत्रपट्टेन मन्त्राद्यैरधिवासयेत् ।।
औषधीनामलाभेतु विष्णुक्रान्तां विशाम्पते ।
बीजानामप्यलाभे तु यवं सर्व्वत्र दापयेत् ।।
अलाभे सर्व्वरत्नानां[7] मुक्ता सर्व्वत्र शस्यते ।
अलाभे सर्व्वरत्ना[8]नां हरितालं विनिःक्षिपेत् ।।
अलाभे सर्व्वलौ[9]हानां काञ्चनानि प्रदापयेत् ।
रत्नन्यासमिमं कृत्वा नपुंसकशिलातले ।।

---

1. प्रकम्पयेत् A, B, तस्य कारकः C.
2. विभर्त्ति नाना B, C. विभक्तिमाला A.
3. कल्पयेत् A कारयेत् B, C.
4. मूलोक्तपाठः B धृतः, नमस्तस्मै महात्मने B, C.
5. कल्पयेत् A, B, कारयेत् C.
6. मन्त्र A रत्न B, C.
7. ओषधीनां A, औषधीनां B, C.
8. सर्व्वधातूनां A, C. सर्व्वरत्नानां B.
9. लोहानां A, लौहानां B, C.

न्यसेत् पादशिलां तत्र स्त्रीलिङ्गैरुपलक्षिताम् ।
तत:[1] संपूजयेद् विद्वान् पिण्डिकां शक्तिरूपिनीम् ॥
महा[2]रङ्गेन वस्त्रेण च्छाद्य गन्धादिनार्च्चयेत् ।
पुष्पैर्मूलैः फलै र्हृद्यैः (?) सितया चार्द्रकेण च ॥
अभ्यर्च्च्य विन्यसेद् विद्वान् लक्ष्मीवीजं समाहितः ।
कृत्वैवं पिण्डिकाकर्म्म तदूर्द्ध्वं प्रतिमां[3] न्यसेत् ॥
प्रासादानान्तु सर्व्वेषां प्रतिमा जीव उच्यते ।
प्रतिमानान्तु सर्व्वासां पादपीठः शिलामयः ॥
तस्मात् सर्व्वप्रयत्नेन पीठोर्द्ध्वं[4] प्रतिमा भवेत् ॥

इति हयशीर्षे पञ्चरात्रे रत्नन्यासपटलम् ॥३८॥

---

1. ततः A, तत्र B, C.
2. मह......A, B, महारङ्गेन C.
3. प्रतिमा A प्रतिमां B, C.
4. पीठोर्द्ध्वमिति A B पुस्तकयोर्नास्ति C. पुस्तके च वर्त्तते ॥

एकोनचत्वारिंशत्तमपटलम्

भगवानुवाच

रत्नन्यासविधिं कृत्वा प्रति[1]ष्ठामारभेद् गुरुः ।
सशलाकैर्दर्भपुञ्जैः सहदेवा समन्वितैः ।। 1
सहाक्षतैस्तु तत्कृत्य पञ्चगव्येन शोधयेत् ।
प्रोक्षयेद् गन्धतोयेन नदीतीर्थोदकेन च ।। 2
होमा[2]र्थं स्थण्डिलं कुर्य्यात् सिकताभिः समन्ततः ।
सार्द्धहस्त प्रमाणस्तु चतुरस्रं सुशोभनम् ।। 3
अष्टदिक्षु यथान्यायं कलसानपि पूजयेत् ।
मन्त्रेणाष्टाक्षरेणैव पूर्व्वादिक्रमयोगतः ।। 4
आ[3]नीय संस्कृतं वह्निं त्वमग्ने व्रतपेत्यृचा ।
पलाशसमिधानान्तु घृताक्तानां सुरेश्वर ।। 5
शतं वाथ सहस्रं वा गायत्र्या विष्णुसंज्ञया ।
जुहुयाच्च शतं पश्चादाज्यमष्टाक्षरेण च[4] । 6
पूर्णाहुतिं शान्तितोयं कुर्य्यात्तित्र विचक्षणः ।।
कलशेषूदकं गृह्य ताम्रपात्रे निवेशयेत् ।। 7
म[5]न्त्रयेच्छतवारांस्तु मूलमन्त्रेण देशिकः ।। 8
सेचयेद्देवतामूर्द्धि श्रोश्च तेत्यनयानघ ।
ब्रह्मयानेन चोद्धत्य उत्तिष्ठ ब्रह्मणस्पते ।
त[6]द् विष्णोरितिमन्त्रेण प्रासादाभिमुखं नयेत् ।। 9
शिविकायां हरिं स्थाप्य रथे वाथ सुय[7]न्त्रितम् ।
भ्रामयीत पुरं सर्व्वमथवायतनं स्वकम् ।। 10

---

1. प्रतिमा A प्रतिष्ठा B, C.
2. होमार्थे A होमार्थं B, C,
3. आनीयं A आनीय B, C.
4. च A तु B, C.
5. मन्त्रयेत् A अर्च्चयेत् B, C.
6. तद् A त्वम् B, C.
7. सुयन्त्रितम् A सुमन्त्रितम् B, C.

प्रदक्षिणेन देवेशं सर्व्वशोभासमन्वितम् ।
ततो मङ्गलघोषैश्च गीतै[1]र्मधुरनिस्वनैः ॥
स्तुवद्भिर्मागधैः सूतैर्वाद्यैर्नानाविधैः शुभैः ।
गायद्भि र्ब्राह्मणैः सामसङ्घाकारेण सर्व्वशः ॥
पताकाभिर्विचित्राभिर्ध्वजैर्नानाविधैः शुभैः[2] ।
देवदेवं महाभागं हरिं सर्व्वजगद्गुरुम् ॥
संसारार्नवसन्तारपोतभूतं सुरेश्वरम् ।
कर्त्तणां स्थपतीनाञ्च शिल्पिनां पुरवासिनाम् ॥
स्थापकनाञ्च भृत्यानां पावनं पुण्यवर्द्धन[3]म् ।
भ्राम्य आयतन द्वारि मुखं कृत्वा निवेशयेत् ॥
शिविकायान्तु संस्थाप्य स्नपयेन्मङ्गलान्वितम् ।
चतस्रो विधवास्तत्र दिव्यमन्त्रादिपिण्डिताः[4] ॥
सव्यापसव्यसूत्रेण वेष्टच स्पृश्य कुशेन[5] तु ।
आचार्य्येणाभ्यनुज्ञाता घटैर्मलयरू[6]षितैः ॥
स्न[7]पयस्ति हरिं भक्त्या अष्टमङ्गलसंयुतम् ।
ततो गन्धादिनाभ्यर्च्च्य मूलमन्त्रेण देशिकः ॥
शुक्लवस्त्रेन संच्छाद्य अष्टाङ्गार्घ्यं निवेदयेत् ।
पात्रे[8]ण यन्त्रितं कृत्वा अतो देवेति चालयेत् ॥
अद्वा[9]रवन्धे प्रासादे द्वारेणैर प्रवेशयेत् ।
द्वारवन्धे कृते दैव[10] आकाशेन प्रवेशयेत् ॥
द्वारवन्धे कृते चापि[11] अस्पृशन्तं प्रवेशयेत् ।
देवस्य त्वेतिमन्त्रेण तिर्य्यगूर्द्धमधस्तथा ॥

---

1. ततो मङ्गलघोषैश्च गीतैः A, मङ्गलै र्ब्रह्मघोषैश्च सर्व्वैः B, C.
2. शुभैः A स्तथा B, C.
3. पावनं पुण्यवर्द्धनम् B, C, पावकं पुण्यवर्द्धकम् A.
4. पिण्डिताः A, मण्डिताः B, C.
5. कुशेन B, C. कुलेन A.
6. रूषितैः A, भूषितैः B, C,
7. स्नपयन्ति A, B, स्नापयस्ति C,
8. पात्रेण A यन्त्रेण B, C.
9. अद्वार A सद्वार B, C.
10. कृते दैव A कृता देव B, C.
11. कृते चापि A कृते वापि B, C.

पिंण्डिकोर्द्धं ततोदेवं मन्त्रितं धारयेत् क्षणम् ।
ततः शङ्क घटीतोयै दैंवज्ञान् लग्नमा[1]विशेत् ।।
ज्ञात्वा सम्यक् स्थिरं[2]लग्नं मनसं वा निवेश[3]येत् ।
पिण्डिकायां सुरश्रेष्ठ मन्त्रेणानेन देशिक : ।।
ओँ त्रैलोक्य विक्रा[4]न्ताय त्रिविक्रमाय नमो नम इति ।।
संस्थाप्य पिण्डिकायान्तु स्थिरं कुर्य्याद्विचक्षणः ।
ध्रुवा द्यौरिति मन्त्रेण विश्वतश्चक्षुरित्यपि ।।
पञ्चगव्येन तं स्नाप्य क्षाल्य गन्धोदकेन तु ।
पूजयेत् सकलीकृत्य साङ्गं सावरणं हरिम् ।।
ध्यायेत् तं परमात्मानं निष्कलं निर्मलं विभुम् ।
गगनं तस्य मूर्त्तिस्तु[5] पृथिवी तस्य पिण्डिका[6] ।।
कल्पयेद् विग्रहं तस्य तैजसैः परमाणुभिः ।
तेजोमयं ततो ध्यायेत् शङ्खचक्रगदाधरम् ।।
मन्त्र[7]मूर्त्तिं ततः कुर्य्यान्मूलमन्त्रेण वै हरेः ।
स्थिते वि[8]भो स्थितिन्यासमासीने सृष्टि संज्ञितम् ।।
शयिते संहृतिन्यासं यानस्थे सर्व्वमेव च ।
एवं न्यासविधिं कृत्वा ध्यायेद् विष्णुं सुरेश्वरम् ।।
कृत्वा चामरमध्यस्थं सर्व्वकर्म्मैंकसाक्षिणम् ।
क्षेत्रज्ञचित्स्वभावन्तमनीयासमनोरपि ।।
आदाय परमेष्ठ्यादीन् प्रतिमाया निवेशये[9]त् ।
सजीवकरणं कृत्वा प्रणवेण निवोधयेत् ।।

---

1. दैवज्ञान् लग्नमाविशेत् A दैवज्ञो लग्नमादिशेत् B, C.
2. स्थितं A, स्थिरं B, C.
3. निवेदयेत् A, निवेशयेत् B, C.
4. विक्रान्ताय A विक्रमाय B, C.
5. मर्त्तिस्तु A, मूर्त्तिं B, मूर्द्धि,स्थम् C.
6. पिण्डिका A, B, पीठका C.
7. मन्त्रमूर्त्तिं A, B.
8. स्थिते विभौ A, स्थितो विष्णौ B.
9. निवेशयेत् A निवेदयेत् B, C

सान्निध्यक(ा?)रणार्थाय हृदयं स्पृश्य देशिकः ।
पौरुषन्तु जपेत् सूक्तं ध्यायेद्देवं सुरे[1]श्वरम् ॥
जपेत् तथापरं मन्त्रमिमं गुह्यं सनातनम् ।
ओँ नमस्तु[2]भ्यं सुरेशाय सन्तोषविभवात्मने ॥
ज्ञान[3]विज्ञानरूपाय ब्रह्मतोजोरु(?)शालिने ।
गुणानुक्रान्त[4]वेशाय पुरुषाय महात्मने ॥
अक्षयाय पुराणाय विष्णो सन्निहितो भव ।
यच्च ते परमं तत्त्वं यच्च ज्ञानमयं वपुः ॥
तत्सर्व्वमेकतो लीनमस्मिन् देहे विवुध्यताम् ।
अनेन सन्निधीकृत्य देवं देवारिसूदनम् ॥
ब्रह्मादिपरिवारांस्तु स्वनामा स्थापयेत् पृथक् ।
आयुधान्यस्य मन्त्रैस्तु नमोऽन्तैः स्थापयेद् वुधः[5] ॥
ततः[6] सन्दर्शयेत् पश्चात् स्वकां मुद्रां पृथक् पृथक् ।
सान्निध्यं तु पुनः कुर्य्यात् प्रणवेन प्लुतेन तु[7] ॥
तस्मिन्नेव मुहूर्त्ते तु हर्षो वा भयमेव च ।
चक्षुर्भ्रमो विभ्रमो वा त्रासो वा जायते यदि ॥
व्यामोहः परमो[8]हो वा स्तनितं परमं तथा ।
अश्रुतानां श्रुतो वा स्याद् गात्राणां वाथ वेपथुः ।
वैराग्यं नेत्रयोर्वा स्याद् दर्पः कन्दर्प एव च ॥
परमो विस्मयो वाथ दिव्यो वा श्रूयते ध्वनिः ।
दिव्यवादित्रघोषो वा गन्धर्व्वनगरस्य वा ॥

---

1. सुरेश्वरम् A सुरोत्तमम् B, C
2. नमस्तुभ्यं A, B, नमस्तेऽस्तु C
3. एतत् पादद्वयं C पुस्तके नास्ति ।
4. गुणानुक्रान्त A, B, गुणानुत्क्रान्त C
5. बुधः A, गुरुः B, C
6. ततः A, स्थाप्य B, C
7. तु A, च B, C
8. परमोहो वा A परमो वाथ B, C

दर्शनं जायते काले तस्मिन् सुरगणार्[1]ञ्चिते ।
नरा नार्य्योऽथ दृश्यन्ते गायन्तोऽप्यथ ह[2]र्षिताः ॥
नन्दितूर्य्य[3]वरो वापि श्रूयते च्छन्दसां ध्वनिः ।
दिव्यगन्धरसा वापि एकस्यापि भवन्ति हि ॥
लिङ्गैरेतैर्विजानीयात् तस्मिन् सन्निहितं हरिम् ।
प्रभा चैव विशेषेण ज्वलन्तीव च दृश्यते ॥
स्फुरन्तीव च दृश्येत प्रतिमा च विशेषतः ।
स्फुरन्निव जनः कश्चित् स्मयमान इव क्वचित् ॥
वीक्षमाणो जनस्तत्र प्रहृष्ट इव लक्ष्यते ।
एतैस्तु लक्षणैर्ज्ञेयस्तत्र सन्निहितो हरिः ॥
विशेषादथवा पश्येच्छयस्थक्रचापोपमं क्वचित् ।
छ[4]वि वज्रप्रभां पश्येत् पद्मरागप्रभां यथा[5] ॥
सौदामिनी (?) प्रभां पश्येत् प्रतिमायां क्वचिद् यदि ।*
एतैर्लिङ्गैस्तु बोद्धव्यस्तत्र सन्निहितो हरिः ॥
वधिरा इव केचित्तु मूका इव तथापरे ।
विभ्रान्ता इव केचिच्च जड़ा इव तथापरे ॥
धावन्त इव केचित्तु पत[6]न्त इव चापरे ।
नृत्यन्त इव चाप्यन्ये मत्ता इव तथा यदि ॥
चित्रस्था इव केचित्तु विवशा इव केचन ।
भवन्ति तत्र चोन्मत्ताः प्रमत्ता इव चापरे ॥

---

1. र्च्चिते A र्च्चित B, C
2. हर्षिताः A भूषिताः B, C
3. A, B, पुस्तकयोः नन्दितूर्य्यवरो इति नास्ति C पुस्तके च वर्त्तते ।
4. छविमिति A B पुस्तकयो र्नास्ति C पुस्तके चवर्त्तते ।
5. यथा A, B तथा C

* पादद्वयमिदं B, C पुस्तकयोर्नास्ति ॥

6. पतन्त A वपन्त B, C.

लिङ्गैरेतैस्तु बोद्धव्यस्तत्र सन्निहितो हरिः ।
एवं यथावद् विधि[1]ना कृत्वा सन्निहितं हरिम् ॥*
कृत्वाष्टाङ्गनमस्कारं प्रणम्याञ्जलिमुद्रया ।
सान्निध्यकरणाच्चाथ ऋत्विग्भिः सहितो गुरुः ॥
स्तूयादुपनिषन्मन्त्रैःऋग्यजुःसामसम्भवैः ।
आरण्यकं पठेत् सर्व्वं पञ्चोपनिषदांस्तथा ॥
स्तुत्वा स्तोत्रैस्तु पौराणैर्जपेदष्टाक्षरं ततः ।
जप्त्वाष्टाक्षरमन्त्रन्तु निर्गत्य द्वारसंस्थितौ ।
चण्डप्रचण्डौ द्वारस्थौ निर्गम्याभ्यर्च्चयेद् गुरुः ॥
अग्र[2]मण्डपमासाद्य गरुड़ं स्थाप्य पूजयेत् ।
दिगीशानथ दिग्देशा[3]न् स्थाप्य संपूज्य देशिकः ॥
विष्वक्सेनन्तु संस्थाप्य मूलमन्त्रेण पूजयेत् ।
तथा शङ्खञ्च चक्रञ्च पूजयेन्मन्त्रवित्तमः ॥
विष्णुञ्च पार्श्वदेवांश्च सर्व्वेभ्यो बलिमाहरेत् ।
एवं कृत्वा गुरुः सम्यक् शुक्लाम्बरधरः शुचिः ॥
शतमष्टोत्तरां जप्त्वा दवं तमभिवादयेत् ।
प्रणाममुद्रया पश्चादष्टाङ्गं प्रणिपत्य च ॥
नृत्यं वाद्यञ्च गेयञ्च नाटचञ्चापि प्रकाश[4]येत् ।
मण्डले कमले वापि स्थापयित्वा गुरुं यजेत् ॥
प्रियप्रश्नैः क्षमाप्यैनं विष्णुवत् पूजयेद् बुधः ॥
पादयोः प्रणिप[5]त्याह दक्षिणाञ्च निवेदयेत् ।
आचार्य्यदक्षिणां दद्यान्नगरं ग्राममेव च ॥

---

1. विधिना A, B बोधेन C

* पादद्वयमिदं क पुस्तके न दृश्यते ।

2. अत्र A अथ B, C

3. दिग् देशान् A देवेशान् B, C

4. नाटचञ्चापि प्रकाशयेत् A, उल्लासञ्चापि कारयेत् B, C ।

5. प्रणिपत्याह A, B, प्रणिगत्य नै C

सुवर्णं रजतं वस्त्रं गां चैव समलङ्कृताम् ।
दक्षिणां विधिवद् दत्त्वा दद्यादाभरणादिकम् ।
यागोपयोगद्रव्याणि सर्व्वाण्यस्मै निवेदयेत् ।।
स्नानीयमण्डपोपेतं सर्व्वोपस्करणादिकम् ।*
मूलयज्ञगृहं दद्यादाचार्य्याय तथा परम् ।
आचार्य्यदक्षिणार्द्धन्तु प्रदद्याद् ब्रह्मदक्षिणाम् ।।
मूर्त्तिपान् पूजयेत् पश्चाद् गोवस्त्राभरणैर्द्विज ।।
सर्व्वांस्तु पूजयेत् तत्र वैष्णवानागतान् द्विजान् ।
भोजयेद् ब्राह्मणान् पश्चादव्यापारमतास्त्रितः ।।
प्राङ्मुखं यजमानन्तु स्थापयित्वा यथाविधि ।
फलं समर्पयेत्तस्मै परितुष्टमना गुरुः ।।
यज्ञः सुपुष्कलः सर्व्वः कर्त्तव्यो धर्म्मलिप्सया ।
मन्त्रहीनो गुरुं हन्याद् राष्ट्रमन्नेन वर्ज्जितः ।।
धर्म्मञ्च यजमानञ्च हन्याद् दक्षिणया विना ।
अयं साधारणः प्रोक्तः प्रतिष्ठापञ्चको मया ।।
सर्व्वेषामेव देवानामेष साधारणः स्मृतः ।†
यो विष्णुं स्थापयेद्देवं सर्व्वलोकनमस्कृतम् ।।
स्थापितं तेन सर्व्वं स्याज्जगत् स्थावरजङ्गमम् ।
अतीतान् दशपूर्व्वांस्तु तथैवानागतान् दश ।।
आत्मानं सपरीवारं विष्णुलोकं नयेन्नरः ।
कोटि[1]जन्मगतं पापं स्वल्पकं यदि वा गुरु[2] ।।
तत् सर्व्वं भस्मसात् कुर्य्यात् संस्थाप्य मधुघातिनम् ।।

इति हयशीर्षे पञ्चरात्रे प्रतिष्ठा पटलम् ।।३९।।

---

* एतत्पादद्वयानन्तरं C पुस्तके प्रियप्रश्नैः क्षयाप्यैनं विष्णुवत् पूजयेद् बुधः इति पादद्वयं वर्त्तते। परन्तु एतत् पादद्वयस्य C पुस्तके एव "मण्डले कमले वापि स्थापयित्वा गुरुं यजेत्" इत्यनन्तरमपि दर्शनात् अत्र परित्यज्यते ।

† पादद्वयमिदं B, C पुस्तयोर्नास्ति ।

1. कोटिजन्मगतं A, B, कोटिजन्मकृतं C

2. गुरु A, B, बहु C

चत्वारिंशत्तम पटलम्

भगवानुवाच

अतः परं प्रवक्ष्यामि यज्ञस्याभवभृतं तव ।
शोधयेद् गोमयैर्विप्र यागस्थानन्तु सर्व्वतः ॥
सिक्त्वा गन्धोदकेनाथ पञ्चगव्येन[2] शोधयेत् ।
विकि[1]रैः शोधयेद् भूमिं वितानेन विभूषयेत् ॥
पुष्पदामैरधश्चोर्द्ध्वं पार्श्वतश्चापि शोधयेत् ।
जुहुयाद् वैष्णवे वह्नौ घृतमष्टोत्तरं शतम् ॥
विष्णोर्लुगिति (?) मन्त्रेण समिधोऽष्टशतं तथा ।
वेद्यामालिख्य विधिना एकाशीतिघटान् बुधः ॥
वैष्णवं कलसं मध्ये आजिघ्रेति निवेशयेत् ।
एकाशीतिपदे कुम्भान् श्रीसूक्तेन निवेशयेत् ॥
शन्नो देवीति मन्त्रेण कलसानभिमन्त्रयेत् ।
कलसे विन्यसेत् पञ्चगव्यं मन्त्रैर्विशेषतः ॥
फलं पु[3]ष्पं न्यसेत् तत्र[4] द्रावितं कदलीजलम् ।
मन्त्रयीत त्र (द्व?) यञ्चैतद् याः फलिनीति सत्तम ॥
एक्षवं च रसं विद्वान् या दिव्येति निवेशयेत् ।
गन्धतो[5]ऽर्घ्यं न्यसेन्मध्ये नवकानां सुरोत्तम ॥
........इत्यृ[6]चा विद्वान् वस्त्रपूतं समाहितः ।
नदीनदतड़ागोत्थैः शेषांस्तोयैः प्रपूरयेत् ॥

---

1. विकिरैः A, B, विविधैः C.
2. B, C पुस्तकयोः पुटानित्यपपाठः ।
3. पुष्पं A, तोयं B, C
4. तत्र A विप्र B, C
5. गन्ध B, Z मन्त्र A
6. A, B पुस्यकयोः इत्यूचा इत्यतः आरभ्य वर्त्तते।
   C पुस्तके च विद्वान् इत्यतः आरभ्य वर्त्तते ।

अपराजितमन्त्रेण सर्व्वानिवाभिमन्त्रयेत् ।
नवेन सुक्लवस्त्रे (र्णे?)ण सर्व्वानिवाभिवेष्टयेत् ॥
गायत्रीं वैष्णवीं जप्त्वा मूलमन्त्रशतं जपेत् ।
जप्त्वा ध्यायन् हरिं सम्यक् प्रविश्याभ्यन्तरं शुचिः ॥
कृष्णोऽसीति च निर्माल्यं विष्वक्सेनाय निक्षिपेत् ।
अर्घ्यं दत्वा शुद्धवत्या शुद्धतोयेन सेचयेत् ॥
अग्निर्मूर्द्धेत्युष्णजलैः स्नाप्यं[1] (?) स्नानं समार[2]भेत् ।
गोमूत्रेण हरिं क्षाल्य गोमयेन विलेपयेत् ॥
क्षीरेण स्नापयेत् पश्चाद् द[3]ध्ना च तदनन्तरम् ।
घृतेन स्नाप्य विधिना धूपं दद्यात्तु गुग्गु[4]लुम् ॥
प्रक्षाल्य को[5]ष्णतोयेन फलतोयेन सेचयेत् ॥
स्नापयेत् कदलीतोयैस्ततस्त्विक्षुरसेन च ।
यैर्मन्त्रैर्मन्त्रयेत् तोयं तैर्मन्त्रैः स्नापयेद्धरिम् ॥
पञ्चनद्येत्यृचा पश्चान्नदीनद तड़ाग[6]जैः ।
स्न[7]पयित्वा विधानेन स वस्त्रयुग्ममुपाहरेत् ॥
कार्पासं पट्टसूत्रं वा कौषेयं वाथ भू[8]षितम् ।
वृहस्पतेति मन्त्रेण परिधाप्यार्च्चयेत् क्रमात् ॥
गन्धादिभिः समभ्यर्च्च्य पार्षदान् पूजयेत्ततः ।
निवेदयीत नैवेद्यं भोक्ष्यं भोज्यं सुपुष्क[9]लम् ॥
पेयं चोष्यं तथा लेह्यं प्रभूतं द्विजसत्तम ।
बलिं विनिक्षिपेत् पश्चाद् दिशासु विदिशासु च ॥

---

1. स्नाप्यं (?) A, B, स्थाप्य C.
2. समारभेत् A, B, निवेशयेत् C.
3. दध्ना च B, C, दधिना A.
4. तु गुग्गुलुम् A सगुग्गुलुम् B, सगुग्गुलम् C.
5. कोष्ण A, चोष्ण B, C.
6. तथागतैः A तड़ागजैः B, C.
7. स्नपयित्वा A स्नापयित्वा B, C.
8. वा थ भषितम् A, वा विभूषितम् B, वा विभूपयत् C.
9. सुपुष्कलं A सुपेशलं B, C.

ओँ नमः पार्श्वदादिभ्यो[1]ऽथ वलिं पीठे विनिक्षिपेत् ।
ततः प्रदक्षिणीकृत्य मण्ड[2]ल ब्राह्मणेनतु ॥
प्रविश्य भवनं भूयः प[3]र्व्वमारण्यकं पठेत् ।
पौराणैश्च स्तवैः स्तुत्वा महापुरुषपूर्व्वकैः ॥
दण्डवत् प्रणमेत् पश्चान्नृत्यगीतादि कारयेत् ।
दद्यात् सुवर्णं गां वस्त्रं दक्षिणां देशिकायतु ॥
वैष्णवान् पूज्य शक्त्या तु ब्राह्मणेभ्यश्च दक्षिणाम् ।
आचार्य्यं तोष्य यत्नेन सन्ध्यायां वलिमहरेत् ॥

इति हयशीर्षे पञ्चरात्रे अस्वभृतस्थानपटलम् ॥४०॥

---

1. पार्श्वदादिघ्यो A पारिषदेभ्यो B, C.
2. मण्डल A मण्डलं B, C.
3. पर्व्व A सर्व्व B, C.

एकचत्वारिंशत्तम पटलम

भगवानुवाच

त[1]था परं प्रवक्ष्यामि विस्तरं बलिकर्म्मणाम् ।
संपाद्य वैष्णवे वह्नौ क्रमादन्नं चतुर्विधम् ।।
सोपदंशं[2] घृतेनाक्तं कृतं वा लौकिकेऽन[3]ले ।
भमौ मण्डलि[4]कं कृत्वा प्रोक्ष्य र्विहः प्रकल्प[5]येत् ।।
स्थानं ताम्रमयं तत्र समानीय निवेशयेत् ।
तस्मिन् प्रकल्पयेत् पीठं हविषा विधिना सुधीः ।।
परमेष्ठ्यात्मिकां शक्तिं तन्मध्ये विन्यसेत् त[6]तः ।
दीक्षाभिः पुरुषाभिश्च चतुर्भिर्ब[7]लिसंयुताम ।।
तन्मध्ये स्थापयेद् गर्भं[8] चक्रं चाथ सुदर्शनम् ।
दीक्षितस्य द्विजातेस्तु तत्पात्रं शिरसिन्यसेत् ।।
शेषमन्नन्तु संगृह्य दद्यादन्योन्यभाजने ।
घण्टाञ्च धूपपात्रञ्च गृह्यान्य स्तत्रगच्छति ।।
सुमनोभिर्जलैर्युक्तं पात्रं गृह्य परो[9] व्रजेत् ।
चन्द्रांशुविमलं छत्रं धारयेदपरः सुचिः ।।
मृदङ्गभेरीपटह[10] काहला शङ्खनिस्वनैः ।
नर्त्तकैर्गायकै श्चैव वंशवाद्यै र्मनोहरैः ।।

---

1. तथा A, अतः B, C.
2. सापदंशं A, B, सोपदंशं C.
3. अनले A, नतु B, लनन(?)C.
4. मण्डलिकं A, च मण्डलं B, C.
5. प्रकल्पयेत् A प्रकीर्णयेत् B, C.
6. ततः A, वुधः B, C.
7. दीक्षाभिः पुरुषाभिश्च चतुर्भिर्वलि इत्यादिकं A, B पुस्तकयोर्नास्ति ।
8. गर्भमिति A B पुस्तयोर्नास्ति ।।
9. परो B, C, पुरौ A.
10. पटहैः A, B पटाह C.

चामरासक्त हस्ताभि र्दिव्यस्त्रीभि र्विशेषतः ।
पताकाभि र्विचित्राभि र्वितानै र्विविधैस्तथा । 9
निर्गच्छेद्देशिकस्तत्र यावद्द्वारं समाहितः ।
प्राप्य द्वारं द्वारपालौ पूजयित्वाऽथ धूपयेत् ॥ 10
प्रक्षिपेच्च वलिं तत्र ध्यात्वाऽनन्तं सुरे[1]श्वरम् ॥
वैनतेयं विघ्नराजं ततः पश्चात्तु दिक्पतीन् ॥ 11
इन्द्रादीनर्च्चयित्वा तु वलिशेषं विनिःक्षिपेत् ।
तत्प्रकाराद् वाह्य(वास्त)देशं निर्गम्य प्रक्षिपेद् वलिम् ॥ 12
गोमयेनोपलिप्तेषु भूप्रदेशेष्वथाष्टसु ।
कुमुदादींस्तु संस्था[2]प्य पूजयित्वा वलिं हरेत् ॥ 13
कोटिसंख्यैर्गणैर्युक्ता[3] (:) पूज्य पश्चाद् वलिं हरेत् ।
कुमुदं कुमुदाक्षञ्च पुण्डरीकञ्च वामनम् ॥ 14
शङ्कुकर्णं सर्व्वनेत्रं सुमुखं सुप्रतिष्ठितम् ।
प्रत्येकं नृत्य[4]गेयाद्यै रेकैकं तोषयेद् गुरुः ॥ 15
वलिपीठं ततः प्राप्य तोयेन क्षालयेत् सुधीः ।
नमोऽस्तु पार्श्वदेभ्योऽथ इति मन्त्रं समुच्चरन् ॥ 16
प्रयच्छे[5]त वुधो यत्नाच्छेषमन्नं जलप्लुतम् ।
तदाचम्य शुचिर्भूत्वा देवागारं प्रविश्य च[6] ॥ 17
मन्त्रेण स्थाप्य तां मूर्त्तिं पादपीठे निधापयेत् ।
मन्त्रान् संहृत्य विन्यस्तान् निर्माल्यं प्रक्षिपेत्ततः ॥ 18
विष्वक्सेनाय देवाय वलिः[7] साधारणस्त्वयम् ।
वलिदान क्रियाद्येषु सर्व्वकर्म्मसु कारक : ॥ 19

---

1. सुरेश्वरं B, C, महेश्वरं A.
2. संस्थात्य A, B, संपूज्य C.
3. र्युक्ता(:?) A, B, र्युंत्तैः C.
4. गीताद्यैः B, C गेयाद्यैः A.
5. प्रयच्छेत A, प्रयच्छेत्तु B, C.
6. च A तु B, C.
7. वलिः A, B, तथा C.

देशिकाय प्रदद्यात्तु गाञ्च वस्त्रं सकाञ्चनम् ।
पुनरन्यप्रकारेण सविशेषं बलिं शृणु ।।
पूर्व्ववत् पात्रमानीय तथैवान्नं चतुर्विधम् ।।
अष्टाङ्गलोच्छ्रितं कुर्य्यात् स्रुचाग्रं पञ्चविस्तृतम् ।
विन्यसेत् काञ्चनं रूप्यं पूर्व्वोक्तविधिना बुधः ।।
वासुदेवं ततो न्यस्य न्यसेन्मासाधिपांस्त[1]तः ।
गन्धाद्यैस्तानर्च्चयित्वा पूर्व्ववन्निगमक्रिया ।।
पूर्व्वोक्तेनैव मन्त्रे[2]ण वलिदानं तत स्ततः ।।
अना[3]य्य दर्शयेद् यत्नाद् वलिं देशिकसत्तमः ।।
तोषयेत् पूर्व्ववद् यत्नाद् गीतनृत्यैस्तु तान् सुरान् ।
भ्रामयित्वा तु शनकैः प्रविशेद्देवसन्निधौ ।।
पूर्व्ववत् संहरेन्मन्त्रान् न्यस्तान् वै[4] देशिकोत्तमः ।।
विष्वक्सेनाय संक्षिप्य[5] निर्माल्यं निक्षिपेत्ततः ।।
एवं विधो वलिर्नित्यं भगवद्वाञ्छितः सदा ।।
कार्य्यः प्रतिष्ठा दिवस मारभ्यानुदिनं[6] नरः ।।

इति हयशीर्षे पञ्चरात्रे वलिदानपटलम् ।।४१।।

---

1. स्ततः A स्तथा B, C.
2. पूर्व्वोक्तेनैव मन्त्रेण A, B, पूर्व्वोक्तेन क्रमेनैव C.
3. आनाय्येति A, B पुस्तकयोर्नास्ति । 4. न्यस्तान् वै A, तानेव B, C.
5. संक्षिप्य B, C. निक्षिप्य A. 6. दिनं A दिवं B, C.

द्विचत्वारिंशत्तम पटलम्

भगवानुवाच

अतः परं प्रवक्ष्यामि द्वार[1]स्य सुरसत्तम ।
प्रतिष्ठां विष्णु[2]सायुज्यद्वारभूतां यथाविधि ॥
सूवर्णाणि अघो दत्त्वा प्रतिद्वारं निवेशयेत् ॥
तदा प्रतिष्ठिते विष्णो प्रतिष्ठा द्वारजा भवेत् ॥
द्वार[3]बन्धं विना यत्र वासुदेवः प्रतिष्ठितः ।
तदा पश्चाद् बुधैः कार्य्या प्रतिष्ठा द्वारजा द्विज ॥
अथ कृत्वा द्वार[4]बन्धं प्रतिष्ठा क्रियते नरैः ॥
अत्रा[5]दौ विधिवद् द्वार प्रतिष्ठां कारयेद् बुधः ।
शाखोदुम्बरकौ सिच्य[6] अष्टभिः कलसैः शुभैः ॥
रत्नौषधियुतौ विप्र वस्त्र[7]युग्मेन वेष्टयेत् ॥
गन्धादिभिः समभ्यर्च्च्य मन्त्रैर्वेदादिभिर्गुरुः ।
धूरसीति च संधूप्य नैवेद्यं विनिवेद[8]येत् ॥
कुण्डेषु होमयेद् वह्निं समिल्लाजतिलादिभिः ।
गोपुरं वर्द्धयेद् यत्नात् पदान्तस्था[9]मरैः पदैः ॥
तत्रार्च्चयेत् सुरौ द्वौ द्वौ प्रागादिषु यथाक्रमम् ।
इन्द्रसूर्य्यादियोगेन मध्य[10]गौ द्विजसत्तम ॥

---

1. द्वारस्य A, B, श्रीबासा C.
2. विष्णुं A, B, द्वारं C.
3. बन्धं A, B, यन्त्रं C.
4. बन्धं A, B, यन्त्रं C.
5. अत्रादौ A, B, अथादौ C.
6. शाखोदुम्बरकौ णिच्य , B, माखौत्वमुकौ विप्र(?)C.
7. वस्त्र A, B, स्नाप्य C.
8. विनिवेदयेत् A, B, वि(नि)वेशयेत् C.
9. पदान्तस्था A, B, पादान्तस्था C.
10. मध्यगौ A, B, मध्यमौ C.

कुशपुष्पाक्षतै र्भक्त्या शय्या[1]दीनि च दापयेत् ।
आधारशक्ति तत्राधो न्यसेद्देशिकसत्तमः ॥
शाखयोर्विन्यसेन्मूले देवौ चण्डप्रचण्डकौ ।
ऊर्द्धोदुम्बर[2]के देवीं लक्ष्मीं सुरगणार्च्चिता[3]म् ॥
न्यस्याभ्यर्च्च्य यथान्यायं श्रीसूक्तेन द्विजोत्तमः ॥
होमयेत् श्रीफलैः साष्टशतं घृतपरिप्लुतम् ॥
आदित्यवर्णेत्यनया ऋचा मूलेन वा द्विजः ।
अतः[4] पूर्णाहुतिं दत्त्वा वैष्णवान् भोजयेद्द्विजा[5]न् ॥
सुवर्णशृङ्गीं विधिवत् प्रदद्यात् सुसमाहितः ।
तथैवाभरणं भक्त्या दद्यात् सर्व्वाङ्गिकं शुभम् ॥
एवं सन्तोष्य विधिवत् प्रियप्रश्नेन चैव हि ॥
आचार्य्यदक्षिणां दत्त्वा[6] मूर्त्तिपानपि पूजयेत् ॥
गोहिरण्यादिदानेन प्रियप्रश्नेन सर्व्वथा ।
एवं कृत्वा ततः पश्चात् नृत्यं गेय[7]ञ्च कारयेत् ॥
एषा संक्षेपतः प्रोक्ता प्रतिष्ठा ते मयानघ ॥
पूर्व्वमे[8]व स्थापितस्य द्वारस्य कमलोद्भव ।
आदौ द्वार प्रतिष्ठा स्यात् पश्चाद् देवस्य कार[9]येत् ॥

---

1. शय्यादीनि A, B, शक्त्यादीनि C.
2. C पुस्तके ऊर्द्धोदुम्वरके इति पाठो नास्ति ।
3. ताम् A, B तम् C.
4. अतः A ततः B, C.
5. वैष्णवान् भोजयेद् द्विजान् A, B,
   भोजयेद् वैष्णवान् द्विजान् C.
6. दत्त्वा A, दद्यात् B, C.
7. गेयं A, गीतं B, C.
8. एवस्थापितस्य B, C. एवास्थापितस्य A.
9. आदौ द्वारप्रतिष्ठा स्यात पश्चाद्देवस्य कारयेत् B, C.
   आदौ देवप्रतिष्ठा स्यात् पश्चाद् द्वारस्य कारयेत् A.

तत्र संप्रोच्यमानं मे विशेषं शृणु पद्मज ।*
चतुःषष्टिपदं कृत्वा द्वारदेशं विचक्षणः ।
तत्रार्च्च्य देवताः सर्व्वा द्वारद्रव्य मुपाहरेत् ।
कषायैर्गन्धतोयैश्च सर्व्वौषधिजलैस्तथा ॥
अवलिप्य स्नानमन्त्रैर्गन्धपुष्पाधि[1]वासितम् ।
वेष्टितं वस्त्रयुग्मैस्तु[2] कृत्वा मन्त्रेण मन्त्रितम् ॥
आधारशक्त्याद्युपरि पञ्चरत्नानि विन्यसेत् ।
उदुम्बरं न्यसेत् तस्मिन् ऊर्द्ध्वं रत्नानि विन्यसेत् ॥†
तत्रोर्द्ध्वशाखा[3]युगलं ध्रुवाद्यौरिति विन्यसेत् ॥
शाखयोरुपरिष्टाच्च सुवर्णबीजसंग्रहम् ॥
अमृतां सहदेवाञ्च रोचनां लक्षणां तथा ।
वालुकां जाह्नवीस्रो[4]तः समुद्भूतां कुशांस्तथा[5] ॥
विन्यस्य विन्यसेदूर्द्ध्वं मैन्द्रे सुरसमुद्भ[6]वम् ।
श्रो(श्रा)यन्तीयेन सूक्तेन श्रीसूक्तेन[7] तथा पुनः ॥
ततो विल्वफलं[8] साज्यं जुहुयाद् वैष्णवान[9]ले ।
आदित्यवर्णेत्यनया ऋचा सुरगणार्च्चित ॥

---

* तत्र संप्रोच्यमानं मे विशेषं शृणु पद्मज A.
तत्रैव प्रोच्यमानस्य विशेषं शृणु पद्मज B.
तत्रैव प्रोच्यमानं मे विशेषं शणु पद्मज C.

1. पुष्पाधि A, B, पुष्पादि C.
2. युग्मेश्च A युग्मैस्तु B, C.

† पादद्वयमिदं B पुस्तके नास्ति । A, C पुस्तकयोरस्ति ।

3. ऊर्द्ध्वशाखा A, ऊर्द्ध्वं शाखा B, C.
4. स्रोतः A, B, स्रोतं C.
5. समुद्भूतां कुशांस्तथा A, B, समुद् गतदशास्तथा C.
6. मैन्द्रे सुरसमुद् भवम् A, B, ऊडुम्वर वा मुत्तमम् C.
7. न तथा A, B, नाथवा C.
8. फलं A, B, दलं C.
9. अनले A, अनलं B, C.

वेदादिभिस्ततो हुत्वा समिदाज्यं तिलांश्चरून् ।
भोजयेद् वैष्णवान् भक्त्या मूर्त्तिपान् भोजयेद् गुरुः[1] ।।
सुवर्णवस्त्रदानेन ततो नृत्यादि कारयेत् ।
एवन्तु द्विप्रकारेण प्रतिष्ठा द्वारसंश्रया ।
कीर्त्तिता विष्णुलोकाप्तिद्वारभूता मयानघ ।।
यत्र तां कारयेत् सम्यक् प्रतिष्ठां विधिवन्नरः ।।
स्वर्गद्वारं सुवि[2]धृतं- - - - - - -कारितम् ।।
पीड़ितंनरक द्वारं स्वर्गद्वारं प्रकाशितम् ।
विष्णुलोकं व्रजेद्धीरः स्वर्गलोकोपरिस्थितम् ।।
तत्रासौ क्रीड़ते नित्यं यावदाहू (भू)तसंप्लवम् ।
द्वारबन्धं बुधः कृत्वा मण्डपस्य समारभेत् ।।
वास्तूपशमनं यज्ञमेकाशीतिपदैर्बुधः ।
प्राकारयज्ञयजनमत ऊर्द्ध्वं विधीयते ।।*

इति हयशीर्षे पञ्चरात्रे द्वार प्रतिष्ठा पटलम् ।।४२।।

1. गुरुं A गुरुम् B, C. 2. सुविधृतं A, B सुविरलं C.

* स्वर्णद्वारमित्यतो विवीयते इत्यन्तः पंक्तिसप्तकात्मको ग्रन्थः B, C पुस्तकयोर्नास्ति पतितः ।

त्रिचत्वारिंशत्तम पटलम्

भगवानुवाच

अतः परं प्रवक्ष्यामि प्रतिष्ठां वेदनिर्म्मिता[1]म् ।
प्रासादस्य महाभाग हृत्प्रति[2]ष्ठेति रिश्रुताम् ॥ 1
समाप्तौ शुकनासाया वेद्याः प्रागगर्भमस्तके ।
सौवर्णं राजतं कुम्भमथवा शुल्व[3]निर्म्मितम् ॥
अष्टरत्नौषधी धातु लोहवीजा[4]न्वितं शुभम् । 2
दुकूलवस्त्रदेवाङ्गवेष्टितं पुष्पशोभितम् ॥ 3
सरित्सरःसमुद्राम्भः पूरितं पञ्चगोरसैः ।
प्रियङ्ग्वशोकपुन्नाग[5]कदम्बाम्रदलाम्वि[6]तम् ॥ 4
मलयागुरुकाश्मीरैर्विलिप्तं धूपधूपितम् ।
कृत्वा मण्डलमध्येतु विधिना चाधिवासितम् ॥ 5
हुत्वा नृसिंहमन्त्रेण सम्पाताज्ये[7]न प्रोक्षितम् ।
नारायणाख्यतत्त्वेन प्राणभूतं न्यसेत् ततः ॥ 6
वैराजरूपं ध्याये[8]त प्रासादस्य सुरेश्वर ॥
ततः पुरुषवत् सर्व्वं प्रासादं चिन्तयेद् बुधः । 7
उत्पत्त्यादिक्रमेनैव सर्व्वं वक्ष्ये तवोपरि ॥
ध्वजारोहवधाने[9]न यथावत् सुरसत्तम । 8
ब्रह्मघोषेण महता वीणावेणुरवेण च ॥
दत्त्वाधः स्व[10]र्णकलसं तत्त्वभुतं घटं न्यसेत् । 9
भोजयेद् वैष्णवान् सर्व्वान् आचार्य्यं ल(?)क्षयेत्ततः ॥

---

1. वेदनिर्म्मिताम् A, B, वेदनिश्चयाम् C.
2. प्रतिष्ठेति विश्रुताम् A, B, प्रतिष्ठा इति स्मृतम् ।
3. शुल्व A, B, शुद्ध C.
4. लोहवीजा A वीजलोहा B, C.
5. पुन्नाग A, B, पुन्नागैः C.
6. आम्रदलान्वितम् A वकुलान्वितम् B. C.
7. आज्येन A, आद्येन B, C.
8. ध्यायेत A तं ध्यायेत् B, C.
9. विधानेन B, C. विधानेतु A.
10. स्वर्ण A, B, सुवर्ण C.

जीवदानेन भक्त्या वा अशोच्येनार्च्चयेद् गुरुम् ।।
गजं मदकलं दद्यादश्वं वा दासमेव वा[1] ।
दासीं सुपेशलां वापि हैमश्रृङ्गीमथापि वा ।।
ततः पश्चाद् वेदिम[2]ध्यं तदूर्द्ध्वं कण्ठबन्धनम् ।
कण्ठोपरिष्टात् कर्त्तव्यं विन्यस्य मलसारकम् ।।
कण्ठोपरिष्टात् कर्त्तव्यं विन्यस्य मलसारकम् ।
तदूर्द्ध्वं चूड़[3]कं कुर्य्यात् चक्रं वाथ सुदर्शनम् ।।
मूर्त्तिं वा वासुदेवस्य ग्रहा[4]न् गुप्तान् निवेशयेत् ।
कलसं वापि[5] कुर्व्वीत तदूर्द्ध्वं चक्रमुत्तमम् ।।
वेद्याश्च परितः स्थाप्या अष्टौ विश्वेश्वरा द्विज ।
चत्वारो वा चतुर्द्दिक्षु स्थापनीया यथाविधि ।।
एषा[6] संक्षेपतः प्रोक्ता हृत्प्रतिष्ठा मया द्विज ।
एषां संस्थापने सर्व्वं प्रतिमोक्तं समाचरेत् ।।
चतुर्थिक विह[7]ायैकं दैवो[8]क्तं सर्व्वमाचरेत् ।।

इति हयशीर्षे पञ्चरात्रे हृत्प्रतिष्ठा पटलम् ।।४३।।

---

1. वा B, C. च A.
2. मघ्यं A वन्धं B, C.
3. चू(चु?)लकं A चूड़कं B. C.
4. ग्रहान् A गुहान् B, C.
5. वापि A वाघ B, C.
6. एषा A, B, एषां C.
7. बिहायैकां A, B, बिहायैनां C.
8. दैवोक्तां A, B, एतत् C.

चतुश्चत्वारिंशत्तम पटलम्

भगवानुवाच

अतः परं प्रवक्ष्यामि ध्वजारोपनमुत्तमम् ।
यत्कृत्वा पुरुषः सम्यक् समग्रं फलमाप्नुयात् ॥१॥
यातुधाना गुह्यकाश्च कुष्माण्डाः खेचरास्तथा ।
छिन्दयन्त्यमरश्रेष्ठ ध्वजहीनं सुरालयम् ॥२॥
ध्वजेन रहिते विप्र प्रासादे तु वृथा भवेत् ।
पुजाहोमादिकं सर्व्वं जपाद्यं यत्कृतं वुधैः ॥३॥
रक्षणेन विना यद्वत् क्षेत्रं नश्येत क्षत्रिणाम् (?)।
ध्वजं विना देवगृहं तथा नश्येत सर्व्वथा ॥४॥
विष्णुपारिषदाः क्रूराः कुष्माण्डाद्याश्च ये स्मृताः ।
पूजादिकन्तु गृह्णति दैवं[2] दृष्टवा न रक्षितम् ॥
दृष्ट्वा ध्वजन्तु देवस्य ज्वलज्ज्वलन वर्च्चसम्[3] ।
नश्यन्ति तत्प्रभावार्क रश्मि क्षिप्तं तमो यथा ॥
प्रासादा[4]रम्भद्रव्याणां यावन्तः परमाणवः ।
तावद्वर्षसहस्राणि तत्कर्त्ता विष्णुलोकभाक् ॥
एत[5]त् पुण्यं कोटिगुणं भवेदारोपिते ध्वजे ।
ब्रह्म कुष्माण्डवेदी विघ्ना[6]नां भ्रमणाद् वायुनानघ ॥
दत्त्व कण्ठस्य वेष्ट[7]ने ज्ञेयं फलं कोटिगुणं ध्वजा[8]त् ।
भोज निवेशयेद् दण्डे दिशासु विदिशासु च ॥

---

1. वेदनिर्म्मिताम्
2. प्रतिष्ठेतिाद्यां A, B, यत्पाद्यं C. 2. दैवं A, B, देवं C.
3. शुल्व ज्वलज्ज्वलन वर्च्चसम् A, B, ज्वलनं ज्वल वर्च्चसम् C.
5. पुन्ना प्रासादारम्भ A, B, प्रासादारिष्ट C.
0. आर एतत् A, B, तत् C.
7. आउ वेदीबिघ्नानां A, B, विम्व द्रव्याणाम् C.
9. विघ
7. वेष्टने A, B, वेष्टनं C. 8. ध्वजात् A, B, ध्वजे C.

सुत्रात्मानं विजानीहि ध्वजदण्डं व्यवस्थितम् ।
चिच्छक्तिं विद्धि तस्यैव ध्वजरूपां चलाचलाम् ॥
पताकां प्रकृतिं विद्धि ध्वजं[1] पुरुषविग्रह[2]म् ।
प्रासादं वासुदेवस्य मूर्त्तिभूतं निबोध मे ॥
(धारणाद्धरणीं विद्धि आकाशं शुषिरात्मकम् ।(?)
तेजस्तत्पाकजं विद्धि वायुं स्पर्शगतं तथा ॥
पाषाणादिष्वेव जलं पार्थिवं पृथिवीगुणम् ।
प्रतिशब्दोद्धं शब्दं स्पर्शः स्यात् कर्कशादिकः ॥
शुक्लादिकं भवेद्रूपं रसनाह्लादि दर्शनम् ।
धूपादिगन्धं गन्धस्तु वाग्गीतादिषु संस्थिता ॥
शुकनासा स्मृता नासा वाहू भद्रकषौ स्मृतौ ।
शिरस्तण्डं निगदितं कलसं मूर्द्धजं स्मृतम् ॥
कण्ठं कण्ठमिति ज्ञेयं स्कन्धं वेदी निगद्यते ।
पायूपस्थे प्रणालेतु त्वक् सुधा परिकीर्त्तिता ॥
मुखं द्वारं भवेदस्य प्रतिमा जीव उच्यते ।
तच्छक्तिः (?) प्रकृतिं विद्धि प्रकृतिं वा (?) तदाकृतिम् ॥
निश्चलं वर्णगर्भोऽ- - - - - धिष्ठातास्य केशव (:) ।
एवमेष हरिः साक्षात् प्रासादत्वेन संस्थितः ॥
ऊर्द्धभागे स्थितो विष्णुरेवमेतद् व्यवस्थितम् ।
एवं स्थितस्य वै तस्य प्रासादस्य यथाविधि ॥
प्रतिष्ठां ध्वजरूपेण श्रृणु मे साम्प्रतं स्फुटम् ।
पूर्व्वं देवासुरे युद्धे विजयार्थं तदामरैः ॥
कृत्वा - - - - - - - वाहनान्यायुधानि च ।
जितं दैत्यबलं सर्व्वं तदासौ ध्वजसंस्थितिः (?) ।
अन्तोर्द्ध्वं कलसं न्यस्त्वा(?) तदूर्द्ध्वं विन्यसेद् ध्वजम् ॥

---

1. दण्डं A, ध्वजं B, C.
2. विग्रहं A, रूपिनं B, C.

विम्वार्द्धमानं चक्रन्तु त्रिभागेनाथ कारयेत् ।
द्वात्रिंशदङ्गलं चक्रं ज्येष्ठादावष्टहानितः ॥
प्रतिमातूर्य्यभागेन कारयेद् वा सुदर्शनम् ।
लोहजं शैलजं वापि कारयेच्चित्त पूर्व्वकम् ॥
अष्टारं द्वादशं वापि मध्ये मूर्त्तिमतान्वितम् ।
नारसिंहेन रौद्रेण विश्वरूपेन वा पुनः ॥*
ध्वजवंशश्च कर्त्तव्यो निर्व्रणः शोभनो दृढ़ः ॥
तदूर्द्ध्वं ताम्रजं चक्रं सूक्ष्मं कुर्य्याद्विजोत्तम ।
प्रासादस्य तु विस्तारो मानं दण्डस्य कीर्त्तितम् ॥
शिखरार्द्धोन वा कु[1]र्य्यात्तत् तृतीयेन वा पुनः ॥
द्वारस्य दैर्घ्याद् द्विगुणं दण्डं[2] वा परिकल्पयेत् ॥
ध्वजयष्टिर्देवगृहे ऐशान्यां दिशि देशिकैः ।
स्थापनीया च वायव्ये[3] साम्प्रतं ध्वज उच्यते ॥
पट्टकार्पासिक्षौमाद्यैर्ध्वजं कुर्य्यात् सुशोभनम् ॥
एकवर्णं विचित्रं वा घण्टाचामरभूषि[4]तम् ।
किङ्किनीजालकोपेतं वर्हिपत्रविभूषितम् ॥
शुक्लादिवर्णं विप्रादि क्रमाद्वा कारयेद् ध्वजम् ।
दण्डाग्राद् धरणीं यावद्धस्तैकं विस्तरेण तु ॥
महाध्वजन्तु विख्यातं सर्व्वकामप्रदं शुभम् ।
तुर्य्यांश[5]हीना विख्याता ध्वजाः सुरगणार्च्चिताः ॥

---

* २८६ पृः धारणादित्यादि द्वितीय पंक्तितः २८९ पृः विश्वरूपेन वा पुनः इत्यन्तो ग्रन्थः A पुतकधृतः । B, C पुतकयोर्नास्ति ॥

1. शिखरार्द्धेन वा कुर्य्यात् इति C पुस्तके नास्ति ।
2. दण्डं A, B, कुण्डं C.
3. च वायव्ये B, C, वायव्ये वा A.
4. बिभूषितम् A, C, अवभूषितम् B.
5. तुर्य्यांश A, B, तुल्याङ्ग C.

प्रभिन्नं कुञ्जरं दद्यादश्वञ्च लक्षणान्वितम् ।
दासं सुपेशलञ्चापि दासीं स्वर्णसमन्विता[1]म् ॥
महाश्रृङ्गीं प्रदद्यात्तु ग्रामञ्च गुरुतुष्टये ।
आचार्य्यं तोषयित्वा तु मूर्त्तिपान् पूजयेद्बु[2]धः ॥
(सुवर्णवस्त्रदानेन वैष्णवानापि पूजयेत् ।
अनिवारितमन्नाद्यं सर्व्ववर्णेषु कारयेत् ॥
तथा नृत्यञ्च पाद्यञ्च वलिं दद्यात्तथा पुन : ॥
एष साधारणः प्रोक्तो ध्वजस्यारोहणे विधिः ।
यस्य देवस्य यत्प्रोक्तमायुधं लिङ्गसूचकम् ॥
तस्य तन्मान्त्रयुक्तेन विधिना स्थापनं स्मृतम् ॥*
अनेन विधिनान्येषां सर्व्वमेतद् विचक्षणः ।
कुर्य्याद् यो देवसदने ध्वजान् विधिविधानतः ॥
तस्य स्व[3]र्गोऽक्षयो लो[4]के वैष्ण[5]वे नात्र संशयः ॥
कदाचिद् यदि मानुष्यं लोक मायान्ति स्वेच्छया ।
तदा सर्व्वेषु भूतेषु[6] ध्वजीभूतः प्रकाश[7]ते ॥
आधारभूतः सर्व्वेषां वन्धुनां धनि[8]नां तथा ।
तस्मात् सर्व्वप्रयत्नेन ध्वजं कुर्य्यात् सुरालये ॥
ध्वजयष्टिप्रदानेन वपुष्मान् जायते[9] नरः ।
ध्वजदा[10]नेन चाप्नोति लोकं शक्रस्य दुर्लभम् ॥

इति हयशीर्षे पञ्चरात्रे द्वादशसाहस्रिके
प्रथमपादे देवप्रतिष्ठापञ्चकं नाम काण्डं समाप्तम् ॥४४॥

---

1. स्वर्णसमन्विताम् A, च लक्षणान्विताम् B, C.
2. बुधः A, ततः B, C.
3. स्याद A स्वर्गो B, C.
4. लोको A, C, लोके B.
5. वैष्णवो A, वैष्णवे B, C.
6. भूतेषु A, लोकेषु B, C.
7. प्रकाशते A, B, प्रकाश्यते C.
8. धनिनां A, प्राणिनां B, C.
9. वपुष्मानपि जायते C. वपुष्मान् जायते नरः A, B.
10. दानेन B, C. मानेन A.